tad it sadhastham abhi cāru dīdhaya gāvo yac chāsan vahatuṁ na dhenavaḥ | mātā yan mantur yūthasya pūrvyābhi vāṇasya saptadhātur ij janaḥ ||

The Pada Paath (Sanskrit)

तत् । इत् । स॒धऽस्थ॑म् । अ॒भि । चारु॑ । दी॒ध॒य॒ । गाव॑: । यत् । शास॑न् । व॒ह॒तुम् । न । धे॒नव॑: । मा॒ता । यत् । मन्तु॑: । यू॒थस्य॑ । पू॒र्व्या । अ॒भि । वा॒णस्य॑ । स॒प्तऽधा॑तुः । इत् । जन॑: ॥

The Pada Paath - transliteration

tat | it | sadha-stham | abhi | cāru | dīdhaya | gāvaḥ | yat | śāsan | vahatum | na | dhenavaḥ | mātā | yat | mantuḥ | yūthasya | pūrvyā | abhi | vāṇasya | sapta-dhātuḥ | it | janaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-032/mantra-rig-10-032-005

MANTRA NUMBER:

Mantra 5 of Sukta 32 of Mandal 10 of Rig Veda
Mantra 5 of Varga 29 of Adhyaya 7 of Ashtak 7 of Rig Veda
Mantra 31 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराडार्चीत्रिष्टुप्

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र वोऽच्छा रिरिचे देवयुष्पदमेको रुद्रेभिर्याति तुर्वणिः । जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिञ्चता मधु ॥

The Mantra without meters (Sanskrit)

प्र वोऽच्छा रिरिचे देवयुष्पदमेको रुद्रेभिर्याति तुर्वणिः । जरा वा येष्वमृतेषु दावने परि व ऊमेभ्यः सिञ्चता मधु ॥

The Mantra's transliteration in English

pra vo 'cchā ririce devayuṣ padam eko rudrebhir yāti turvaṇiḥ | jarā vā yeṣv amṛteṣu dāvane pari va ūmebhyaḥ siñcatā madhu ||

The Pada Paath (Sanskrit)

प्र । वः । अच्छ । रिरिचे । देवऽयुः । पदम् । एकः । रुद्रेभिः । याति । तुर्वणिः । जरा । वा । येषु । अमृतेषु । दावने । परि । वः । ऊमेभ्यः । सिञ्चत । मधु ॥

The Pada Paath - transliteration

pra | vaḥ | accha | ririce | deva-yuḥ | padam | ekaḥ | rudrebhiḥ | yāti | turvaṇiḥ | jarā | vā | yeṣu | amṛteṣu | dāvane | pari | vaḥ | ūmebhyaḥ | siñcata | madhu

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-032/mantra-rig-10-032-006

MANTRA NUMBER:

Mantra 6 of Sukta 32 of Mandal 10 of Rig Veda
Mantra 1 of Varga 30 of Adhyaya 7 of Ashtak 7 of Rig Veda
Mantra 32 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

नि॒धी॒यमा॑न॒मप॑गूळ्हम॒प्सु प्र मे॑ दे॒वानां॑ व्रत॒पा उ॑वाच । इन्द्रो॑ वि॒द्वाँ अनु॒ हि त्वा॑ च॒चक्ष॒ तेना॒हम॑ग्ने॒ अनु॑शिष्ट॒ आगा॑म् ॥

The Mantra without meters (Sanskrit)

निधीयमानमपगूळ्हमप्सु प्र मे देवानां व्रतपा उवाच । इन्द्रो विद्वाँ अनु हि त्वा चचक्ष तेनाहमग्ने अनुशिष्ट आगाम् ॥

The Mantra's transliteration in English

nidhīyamānam apagūḻham apsu pra me devānāṁ vratapā uvāca | indro vidvām̐ anu hi tvā cacakṣa tenāham agne anuśiṣṭa āgām ||

The Pada Paath (Sanskrit)

नि॒ऽधी॒यमा॑नम् । अप॑ऽगूळ्हम् । अ॒प्ऽसु । प्र । मे॒ । दे॒वाना॑म् । व्र॒त॒ऽपाः । उ॒वा॒च॒ । इन्द्रः॑ । वि॒द्वान् । अनु॑ । हि । त्वा॒ । च॒चक्ष॑ । तेन॑ । अ॒हम् । अ॒ग्ने॒ । अनु॑ऽशिष्टः । आ । अ॒गा॒म् ॥

The Pada Paath - transliteration

ni-dhīyamānam | apa-gūḻham | ap-su | pra | me | devānām | vrata-pāḥ | uvāca | indraḥ | vidvān | anu | hi | tvā | cacakṣa | tena | aham | agne | anu-śiṣṭaḥ | ā | agām

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-032/mantra-rig-10-032-007

MANTRA NUMBER:

Mantra 7 of Sukta 32 of Mandal 10 of Rig Veda
Mantra 2 of Varga 30 of Adhyaya 7 of Ashtak 7 of Rig Veda
Mantra 33 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराडार्चीत्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अक्षे॑त्रवित्क्षेत्र॒विदं॒ ह्यप्रा॒ट् स प्रैति॑ क्षेत्र॒विदानु॑शिष्टः । ए॒तद्वै भ॒द्रम॑नु॒शास॑नस्यो॒त स्रु॒तिं वि॑न्दत्यञ्ज॒सीना॑म् ॥

The Mantra without meters (Sanskrit)

अक्षेत्रवित्क्षेत्रविदं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः । एतद्वै भद्रमनुशासनस्योत स्रुतिं विन्दत्यञ्जसीनाम् ॥

The Mantra's transliteration in English

akṣetravit kṣetravidaṁ hy aprāṭ sa praiti kṣetravidānuśiṣṭaḥ | etad vai bhadram anuśāsanasyota srutiṁ vindaty añjasīnām ||

The Pada Paath (Sanskrit)

अक्षे॑त्रऽवित् । क्षे॒त्र॒ऽविद॑म् । हि । अप्रा॑ट् । सः । प्र । ए॒ति॒ । क्षे॒त्र॒ऽविदा॑ । अनु॑ऽशिष्टः । ए॒तत् । वै॒ । भ॒द्रम् । अ॒नु॒ऽशास॑नस्य । उ॒त । स्रु॒तिम् । वि॒न्द॒ति॒ । अ॒ञ्ज॒सीना॑म् ॥

The Pada Paath - transliteration

akṣetra-vit | kṣetra-vidam | hi | aprāṭ | saḥ | pra | eti | kṣetra-vidā | anu-śiṣṭaḥ | etat | vai | bhadram | anu-śāsanasya | uta | srutim | vindati | añjasīnām

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-032/mantra-rig-10-032-008

MANTRA NUMBER:

Mantra 8 of Sukta 32 of Mandal 10 of Rig Veda
Mantra 3 of Varga 30 of Adhyaya 7 of Ashtak 7 of Rig Veda
Mantra 34 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒द्येदु॒ प्राणी॒दम॑मन्नि॒माहापी॑वृतो अधयन्मा॒तुरूध॑: । एमे॑नमाप जरि॒मा युवा॑न॒महे॑ळ॒न्वसु॑: सु॒मना॑ बभूव ॥

The Mantra without meters (Sanskrit)

अद्येदु प्राणीदममन्निमाहापीवृतो अधयन्मातुरूधः । एमेनमाप जरिमा युवानमहेळन्वसुः सुमना बभूव ॥

The Mantra's transliteration in English

adyed u prāṇīd amamann imāhāpīvṛto adhayan mātur ūdhaḥ | em enam āpa jarimā yuvānam ahe̱lan vasuḥ sumanā babhūva ||

The Pada Paath (Sanskrit)

अ॒द्य । इत् । ऊँ इति॑ । प्र । आ॒णी॒त् । अम॑मन् । इ॒मा । अहा॑ । अपि॑ऽवृतः । अ॒ध॒य॒त् । मा॒तुः । ऊध॑ः । आ । ई॒म् । ए॒न॒म् । आ॒प॒ । ज॒रि॒मा । युवा॑नम् । अहे॑ळन् । वसु॑ः । सु॒ऽमना॑ः । ब॒भू॒व ॥

The Pada Paath - transliteration

adya | it | oṃ iti | pra | āṇīt | amaman | imā | ahā | api-vṛtaḥ | adhayat | mātuḥ | ūdhaḥ | ā | īm | enam | āpa | jarimā | yuvānam | aheḷan | vasuḥ | su-manāḥ | babhūva

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-032/mantra-rig-10-032-009

MANTRA NUMBER:

Mantra 9 of Sukta 32 of Mandal 10 of Rig Veda
Mantra 4 of Varga 30 of Adhyaya 7 of Ashtak 7 of Rig Veda
Mantra 35 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

एतानि॑ भ॒द्रा क॑लश क्रियाम॒ कुरु॑श्रवण॒ दद॑तो म॒घानि॑ । दा॒न इद्वो॑ मघवान॒: सो अ॑स्त्व॒यं च॒ सोमो॑ हृ॒दि यं बिभ॑र्मि ॥

The Mantra without meters (Sanskrit)

एतानि भद्रा कलश क्रियाम कुरुश्रवण ददतो मघानि । दान इद्वो मघवानः सो अस्त्वयं च सोमो हृदि यं बिभर्मि ॥

The Mantra's transliteration in English

etāni bhadrā kalaśa kriyāma kuruśravaṇa dadato maghāni | dāna id vo maghavānaḥ so astv ayaṁ ca somo hṛdi yam bibharmi ||

The Pada Paath (Sanskrit)

ए॒तानि॑ । भ॒द्रा । क॒ल॒श॒ । क्रि॒या॒म॒ । कुरु॑ऽश्रवण । दद॑तः । म॒घानि॑ । दा॒नः । इत् । व॒ः । म॒घ॒ऽवा॒न॒ः । सः । अ॒स्तु॒ । अ॒यम् । च॒ । सोम॑ः । हृ॒दि । यम् । बिभ॑र्मि ॥

The Pada Paath - transliteration

etāni | bhadrā | kalaśa | kriyāma | kuru-śravaṇa | dadataḥ | maghāni | dānaḥ | it | vaḥ | magha-vānaḥ | saḥ | astu | ayam | ca | somaḥ | hṛdi | yam | bibharmi

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-001

MANTRA NUMBER:

Mantra 1 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 1 of Varga 1 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 36 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र मा॑ युयुज्रे प्र॒युजो॑ जना॑नां॒ वहा॑मि स्म पू॒षण॒मन्त॑रेण । विश्वे॑ दे॒वासो॒ अध॒ माम॑रक्षन्दु॒:शासु॒रागा॒दिति॒ घोष॑ आसीत् ॥

The Mantra without meters (Sanskrit)

प्र मा युयुज्रे प्रयुजो जनानां वहामि स्म पूषणमन्तरेण । विश्वे देवासो अध मामरक्षन्दुःशासुरागादिति घोष आसीत् ॥

The Mantra's transliteration in English

pra mā yuyujre prayujo janānāṁ vahāmi sma pūṣaṇam antareṇa | viśve devāso adha mām arakṣan duḥśāsur āgād iti ghoṣa āsīt ||

The Pada Paath (Sanskrit)

प्र । मा॒ । यु॒यु॒ज्रे॒ । प्र॒ऽयुज॑: । जना॑नाम् । वहा॑मि । स्म॒ । पू॒षण॑म् । अ॒न्त॑रेण । विश्वे॑ । दे॒वास॑: । अध॑ । माम् । अ॒र॒क्ष॒न् । दु॒:ऽशासु॑: । आ । अ॒गा॒त् । इति॑ । घोष॑: । आ॒सी॒त् ॥

The Pada Paath - transliteration

pra | mā | yuyujre | pra-yujaḥ | janānām | vahāmi | sma | pūṣaṇam | antareṇa | vi śve | devāsaḥ | adha | mām | arakṣan | duḥ-śāsuḥ | ā | agāt | iti | ghoṣaḥ | āsīt

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-002

MANTRA NUMBER:

Mantra 2 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 2 of Varga 1 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 37 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृद्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

सं मा॑ तपन्त्य॒भित॑: स॒पत्नी॑रिव॒ पर्श॑वः । नि बा॑धते॒ अम॑तिर्न॒ग्नता॒ जसु॒र्वेर्न वे॑वीयते म॒तिः ॥

The Mantra without meters (Sanskrit)

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः । नि बाधते अमतिर्नग्नता जसुर्वेर्न वेवीयते मतिः ॥

The Mantra's transliteration in English

sam mā tapanty abhitaḥ sapatnīr iva parśavaḥ | ni bādhate amatir nagnatā jasur ver na vevīyate matiḥ ||

The Pada Paath (Sanskrit)

सम् । मा॒ । त॒प॒न्ति॒ । अ॒भित॑ः । स॒पत्नी॑ःऽइव । पर्श॑वः । नि । बा॒ध॒ते॒ । अम॑तिः । न॒ग्नता॑ । जसु॑ः । वेः । न । वे॒वी॒य॒ते॒ । म॒तिः ॥

The Pada Paath - transliteration

sam | mā | tapanti | abhitaḥ | sapatnīḥ-iva | parśavaḥ | ni | bādhate | amatiḥ | nagnatā | jasuḥ | veḥ | na | vevīyate | matiḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-003

MANTRA NUMBER:

Mantra 3 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 3 of Varga 1 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 38 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- भुरिग्बृहती

स्वर: (Swar) :- मध्यमः

THE MANTRA

The Mantra with meters (Sanskrit)

मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो । सकृत्सु नो मघवन्निन्द्र मृळयाधा पितेव नो भव ॥

The Mantra without meters (Sanskrit)

मूषो न शिश्ना व्यदन्ति माध्य स्तोतारं ते शतक्रतो । सकृत्सु नो मघवन्निन्द्र मृळयाधा पितेव नो भव ॥

The Mantra's transliteration in English

mūṣo na śiśnā vy adanti mādhya stotāraṁ te śatakrato | sakṛt su no maghavann indra mṛḻayādhā piteva no bhava ||

The Pada Paath (Sanskrit)

मूषः । न । शिश्ना । वि । अदन्ति । मा । आऽध्यः । स्तोतारम् । ते । शतक्रतो इति शतऽक्रतो । सकृत् । सु । नः । मघऽवन् । इन्द्र । मृळय । अध । पिताऽइव । नः । भव ॥

The Pada Paath - transliteration

mūṣaḥ | na | śiśnā | vi | adanti | mā | ādhyaḥ | stotāram | te | śatakrato itiśata-krato | sakṛt | su | naḥ | magha-van | indra | mṛḻaya | adha | pitāiva | naḥ | bhava

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-004

MANTRA NUMBER:

Mantra 4 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 4 of Varga 1 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 39 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

कुरुश्रवणमावृणि राजानं त्रासदस्यवम् । मंहिष्ठं वाघतामृषिः ॥

The Mantra without meters (Sanskrit)

कुरुश्रवणमावृणि राजानं त्रासदस्यवम् । मंहिष्ठं वाघतामृषिः ॥

The Mantra's transliteration in English

kuruśravaṇam āvṛṇi rājānaṁ trāsadasyavam | maṁhiṣṭhaṁ vāghatām ṛṣiḥ ||

The Pada Paath (Sanskrit)

कुरुऽश्रवणम् । अवृणि । राजानम् । त्रासदस्यवम् । मंहिष्ठम् । वाघताम् । ऋषिः ॥

The Pada Paath - transliteration

kuru-śravaṇam | avṛṇi | rājānam | trāsadasyavam | maṃhiṣṭham | vāghatām | ṛṣiḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-005

MANTRA NUMBER:

Mantra 5 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 5 of Varga 1 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 40 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

यस्य॑ मा ह॒रितो॒ रथे॑ ति॒स्रो वह॑न्ति साधु॒या । स्तवै॑ स॒हस्र॑दक्षिणे ॥

The Mantra without meters (Sanskrit)

यस्य मा हरितो रथे तिस्रो वहन्ति साधुया । स्तवै सहस्रदक्षिणे ॥

The Mantra's transliteration in English

yasya mā harito rathe tisro vahanti sādhuyā | stavai sahasradakṣiṇe ||

The Pada Paath (Sanskrit)

यस्य॑ । मा॒ । ह॒रितः॑ । रथे॑ । ति॒स्रः । वह॑न्ति । सा॒धु॒ऽया । स्तवै॑ । स॒हस्र॑ऽदक्षिणे ॥

The Pada Paath - transliteration

yasya | mā | haritaḥ | rathe | tisraḥ | vahanti | sādhu-yā | stavai | sahasra-dakṣiṇe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-006

MANTRA NUMBER:

Mantra 6 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 1 of Varga 2 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 41 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

यस्य॒ प्रस्वा॑दसो॒ गिर॑ उप॒मश्र॑वसः पि॒तुः । क्षेत्रं॒ न र॒ण्वमू॒चुषे॑ ॥

The Mantra without meters (Sanskrit)

यस्य प्रस्वादसो गिर उपमश्रवसः पितुः । क्षेत्रं न रण्वमूचुषे ॥

The Mantra's transliteration in English

yasya prasvādaso gira upamaśravasaḥ pituḥ | kṣetraṁ na raṇvam ūcuṣe ||

The Pada Paath (Sanskrit)

यस्य॑ । प्रऽस्वा॑दसः । गिरः॑ । उ॒प॒मऽश्र॑वसः । पि॒तुः । क्षेत्र॑म् । न । र॒ण्वम् । ऊ॒चुषे॑ ॥

The Pada Paath - transliteration

yasya | pra-svādasaḥ | giraḥ | upama-śravasaḥ | pituḥ | kṣetram | na | raṇvam | ūcuṣe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-007

MANTRA NUMBER:

Mantra 7 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 2 of Varga 2 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 42 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

अधि॑ पुत्रोपमश्रवो॒ नपा॑न्मित्रातिथेरिहि । पि॒तुष्टे॑ अस्मि वन्दि॒ता ॥

The Mantra without meters (Sanskrit)

अधि पुत्रोपमश्रवो नपान्मित्रातिथेरिहि । पितुष्टे अस्मि वन्दिता ॥

The Mantra's transliteration in English

adhi putropamaśravo napān mitrātither ihi | pituṣ ṭe asmi vanditā ||

The Pada Paath (Sanskrit)

अधि॑ । पु॒त्र । उ॒प॒म॒ऽश्र॒वः॒ । नपा॑त् । मि॒त्र॒ऽअ॒ति॒थेः॒ । इ॒हि॒ । पि॒तुः॒ । ते॒ । अ॒स्मि॒ । व॒न्दि॒ता ॥

The Pada Paath - transliteration

adhi | putra | upama-śravaḥ | napāt | mitra-atitheḥ | ihi | pituḥ | te | asmi | vand itā

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-008

MANTRA NUMBER:

Mantra 8 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 3 of Varga 2 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 43 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- पादनिचृद्गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

यदीशीया॒मृता॑नामु॒त वा॒ मर्त्या॑नाम् । जीवे॒दिन्म॒घवा॒ मम॑ ॥

The Mantra without meters (Sanskrit)

यदीशीयामृतानामुत वा मर्त्यानाम् । जीवेदिन्मघवा मम ॥

The Mantra's transliteration in English

yad īśīyāmṛtānām uta vā martyānām | jīved in maghavā mama ||

The Pada Paath (Sanskrit)

यत् । ईशी॑य । अ॒मृता॑नाम् । उ॒त । वा॒ । मर्त्या॑नाम् । जीवे॑त् । इ॒त् । म॒घऽवा॑ । मम॑ ॥

The Pada Paath - transliteration

yat | īśīya | amṛtānām | uta | vā | martyānām | jīvet | it | magha-vā | mama

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-033/mantra-rig-10-033-009

MANTRA NUMBER:

Mantra 9 of Sukta 33 of Mandal 10 of Rig Veda
Mantra 4 of Varga 2 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 44 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूषः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- गायत्री

स्वर: (Swar) :- षड्जः

THE MANTRA

The Mantra with meters (Sanskrit)

न दे॒वाना॒मति॑ व्र॒तं श॒तात्मा॑ च॒न जी॑वति । तथा॑ यु॒जा वि वा॑वृते ॥

The Mantra without meters (Sanskrit)

न देवानामति व्रतं शतात्मा चन जीवति । तथा युजा वि वावृते ॥

The Mantra's transliteration in English

na devānām ati vrataṁ śatātmā cana jīvati | tathā yujā vi vāvṛte ||

The Pada Paath (Sanskrit)

न । दे॒वाना॑म् । अति॑ । व्र॒तम् । श॒तऽआ॑त्मा । च॒न । जी॒व॒ति॒ । तथा॑ । यु॒जा । वि । व॒वृ॒ते॒ ॥

The Pada Paath - transliteration

na | devānām | ati | vratam | śata-ātmā | cana | jīvati | tathā | yujā | vi | vavṛte

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-001

MANTRA NUMBER:

Mantra 1 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 1 of Varga 3 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 45 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकृषिप्रशंसा

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

प्रा॒वे॒पा मा॑ बृह॒तो मा॑दयन्ति प्रवाते॒जा इरि॑णे॒ वर्वृ॑तानाः । सोम॑स्येव मौजव॒तस्य॑ भ॒क्षो वि॒भीद॑को॒ जागृ॑वि॒र्मह्य॑मच्छान् ॥

The Mantra without meters (Sanskrit)

प्रावेपा मा बृहतो मादयन्ति प्रवातेजा इरिणे वर्वृतानाः । सोमस्येव मौजवतस्य भक्षो विभीदको जागृविर्मह्यमच्छान् ॥

The Mantra's transliteration in English

prāvepā mā bṛhato mādayanti pravātejā iriṇe varvṛtānāḥ | somasyeva maujavatasya bhakṣo vibhīdako jāgṛvir mahyam acchān ||

The Pada Paath (Sanskrit)

प्रा॒वे॒पाः । मा॒ । बृ॒ह॒तः । मा॒द॒य॒न्ति॒ । प्र॒वा॒ते॒ऽजाः । इरि॑णे । वर्वृ॑तानाः । सोम॑स्यऽइव । मौ॒ज॒ऽव॒तस्य॑ । भ॒क्षः । वि॒ऽभीद॑कः । जागृ॑विः । मह्य॑म् । अ॒च्छा॒न् ॥

The Pada Paath - transliteration

prāvepāḥ | mā | bṛhataḥ | mādayanti | pravāte--jāḥ | iriṇe | varvṛtānāḥ | somasya-iva | mauja-vatasya | bhakṣaḥ | vi-bhīdakaḥ | jāgṛviḥ | mahyam | acchān

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-002

MANTRA NUMBER:

Mantra 2 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 2 of Varga 3 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 46 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

न मा॑ मिमेथ॒ न जि॑हीळ ए॒षा शि॒वा सखि॑भ्य उ॒त मह्य॑मासीत् । अ॒क्षस्या॒हमे॑कप॒रस्य॑ हे॒तोरनु॑व्र॒ता॒मप॑ जा॒याम॑रोधम् ॥

The Mantra without meters (Sanskrit)

न मा मिमेथ न जिहीळ एषा शिवा सखिभ्य उत मह्यमासीत् । अक्षस्याहमेकपरस्य हेतोरनुव्रतामप जायामरोधम् ॥

The Mantra's transliteration in English

na mā mimetha na jihīḻa eṣā śivā sakhibhya uta mahyam āsīt | akṣasyāham ekaparasya hetor anuvratām apa jāyām arodham ||

The Pada Paath (Sanskrit)

न । मा॒ । मि॒मे॒थ॒ । न । जि॒ही॒ळे॒ ए॒षा । शि॒वा । सखि॑ऽभ्यः । उ॒त । मह्य॑म् । आ॒सी॒त् । अ॒क्षस्य॑ । अ॒हम् । ए॒क॒ऽप॒रस्य॑ । हे॒तोः । अनु॑ऽव्रताम् । अप॑ । जा॒याम् । अ॒रो॒ध॒म् ॥

The Pada Paath - transliteration

na | mā | mimetha | na | jihīḻe eṣā | śivā | sakhi-bhyaḥ | uta | mahyam | āsīt | akṣasya | aham | eka-parasya | hetoḥ | anu-vratām | apa | jāyām | arodham

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-003

MANTRA NUMBER:

Mantra 3 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 3 of Varga 3 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 47 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

द्वेष्टि॑ श्व॒श्रूरप॑ जा॒या रु॑णद्धि॒ न ना॑थि॒तो वि॑न्दते मर्डि॒तार॑म् । अश्व॑स्येव॒ जर॑तो॒ वस्न्य॑स्य॒ नाहं वि॑न्दामि कित॒वस्य॒ भोग॑म् ॥

The Mantra without meters (Sanskrit)

द्वेष्टि श्वश्रूरप जाया रुणद्धि न नाथितो विन्दते मर्डितारम् । अश्वस्येव जरतो वस्न्यस्य नाहं विन्दामि कितवस्य भोगम् ॥

The Mantra's transliteration in English

dveṣṭi śvaśrūr apa jāyā ruṇaddhi na nāthito vindate marḍitāram | aśvasyeva jarato vasnyasya nāhaṁ vindāmi kitavasya bhogam ||

The Pada Paath (Sanskrit)

द्वेष्टि॑ । श्व॒श्रूः । अप॑ । जा॒या । रु॒ण॒द्धि॒ । न । ना॒थि॒तः । वि॒न्द॒ते॒ । म॒र्डि॒तार॑म् । अश्व॑स्यऽइव । जर॑तः । वस्न्य॑स्य । न । अ॒हम् । वि॒न्दा॒मि॒ । कि॒त॒वस्य॑ । भोग॑म् ॥

The Pada Paath - transliteration

dveṣṭi | śvaśrūḥ | apa | jāyā | ruṇaddhi | na | nāthitaḥ | vindate | marḍitāram | aśvasya-iva | jarataḥ | vasnyasya | na | aham | vindāmi | kitavasya | bhogam

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-004

MANTRA NUMBER:

Mantra 4 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 4 of Varga 3 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 48 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒न्ये जा॒यां परि॑ मृशन्त्यस्य॒ यस्यागृ॑ध॒द्वेद॑ने वा॒ज्य१॒॑क्षः । पि॒ता मा॒ता भ्रात॑र एनमाहु॒र्न जा॑नीमो॒ नय॑ता ब॒द्धमे॒तम् ॥

The Mantra without meters (Sanskrit)

अन्ये जायां परि मृशन्त्यस्य यस्यागृधद्वेदने वाज्यक्षः । पिता माता भ्रातर एनमाहुर्न जानीमो नयता बद्धमेतम् ॥

The Mantra's transliteration in English

anye jāyām pari mṛśanty asya yasyāgṛdhad vedane vājy akṣaḥ | pitā mātā bhrātara enam āhur na jānīmo nayatā baddham etam ||

The Pada Paath (Sanskrit)

अ॒न्ये । जा॒याम् । परि॑ । मृ॒श॒न्ति॒ । अ॒स्य॒ । यस्य॑ । अगृ॑धत् । वेद॑ने । वा॒जी । अ॒क्षः । पि॒ता । मा॒ता । भ्रात॑रः । ए॒न॒म् । आ॒हुः॒ । न । जा॒नी॒मः॒ । नय॑त । ब॒द्धम् । ए॒तम् ॥

The Pada Paath - transliteration

anye | jāyām | pari | mṛśanti | asya | yasya | agṛdhat | vedane | vājī | akṣaḥ | pitā | mātā | bhrātaraḥ | enam | āhuḥ | na | jānīmaḥ | nayata | baddham | etam

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-005

MANTRA NUMBER:

Mantra 5 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 5 of Varga 3 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 49 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्दः (Chhand) :- विराट्त्रिस्टुप्

स्वरः (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदा॒दीध्ये॒ न द॑विषाण्येभिः परा॒यद्भ्योऽव॑ हीये॒ सखि॑भ्यः । न्यु॑प्ताश्च ब॒भ्रवो॒ वाच॒मक्र॑तँ॒ एमीदे॑षां निष्कृ॒तं जा॒रिणी॑व ॥

The Mantra without meters (Sanskrit)

यदादीध्ये न दविषाण्येभिः परायद्भ्योऽव हीये सखिभ्यः । न्युप्ताश्च बभ्रवो वाचमक्रतँ एमीदेषां निष्कृतं जारिणीव ॥

The Mantra's transliteration in English

yad ādīdhye na daviṣāṇy ebhiḥ parāyadbhyo 'va hīye sakhibhyaḥ | nyuptāś ca babhravo vācam akratam̐ emīd eṣāṁ niṣkṛtaṁ jāriṇīva ||

The Pada Paath (Sanskrit)

यत् । आ॒ऽदी॒ध्ये॒ । न । द॒वि॒षा॒णि॒ । ए॒भिः॒ । प॒रा॒यत्ऽभ्यः॑ । अव॑ । हीये॑ । सखि॑ऽभ्यः । निऽउ॑प्ताः । च॒ । ब॒भ्रवः॑ । वाच॑म् । अक्र॑त । एमि॑ । इत् । ए॒षा॒म् । निः॒ऽकृ॒तम् । जा॒रिणी॑ऽइव ॥

The Pada Paath - transliteration

yat | ādīdhye | na | daviṣāṇi | ebhiḥ | parāyat-bhyaḥ | ava | hīye | sakhi-bhyaḥ | ni-uptāḥ | ca | babhravaḥ | vācam | akrata | emi | it | eṣām | niḥ-kṛtam | jāriṇī-iva

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-006

MANTRA NUMBER:

Mantra 6 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 1 of Varga 4 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 50 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒भामे॑ति कित॒वः पृ॒च्छमा॑नो जे॒ष्यामीति॑ त॒न्वा॒३॑ शूशु॑जानः । अ॒क्षासो॑ अस्य॒ वि ति॑रन्ति॒ काम॑ं प्रति॒दीव्ने॒ दध॑त॒ आ कृ॒तानि॑ ॥

The Mantra without meters (Sanskrit)

सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा शूशुजानः । अक्षासो अस्य वि तिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि ॥

The Mantra's transliteration in English

sabhām eti kitavaḥ pṛcchamāno jeṣyāmīti tanvā śūśujānaḥ | akṣāso asya vi tiranti kāmam pratidīvne dadhata ā kṛtāni ||

The Pada Paath (Sanskrit)

स॒भाम् । ए॒ति॒ । कि॒त॒वः । पृ॒च्छमा॑नः । जे॒ष्यामि॑ । इति॑ । त॒न्वा॑ । शूशु॑जानः । अ॒क्षासः॑ । अ॒स्य॒ । वि । ति॒र॒न्ति॒ । काम॑म् । प्र॒ति॒ऽदीव्ने॑ । दध॑तः । आ । कृ॒तानि॑ ॥

The Pada Paath - transliteration

sabhām | eti | kitavaḥ | pṛcchamānaḥ | jeṣyāmi | iti | tanvā | śūśujānaḥ | akṣāsaḥ | asya | vi | tiranti | kāmam | prati-dīvne | dadhataḥ | ā | kṛtāni

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-007

MANTRA NUMBER:

Mantra 7 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 2 of Varga 4 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 51 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकृषिप्रशंसा

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒क्षास॒ इद॑ङ्कु॒शिनो॑ नितो॒दिनो॑ नि॒कृत्वा॑न॒स्तप॑नास्तापयि॒ष्णव॑: । कु॒मा॒रदे॑ष्णा॒ जय॑तः पु॒न॒र्हणो॒ मध्वा॒ सम्पृ॑क्ताः कित॒वस्य॑ ब॒र्हणा॑ ॥

The Mantra without meters (Sanskrit)

अक्षास इदङ्कुशिनो नितोदिनो निकृत्वानस्तपनास्तापयिष्णवः । कुमारदेष्णा जयतः पुनर्हणो मध्वा सम्पृक्ताः कितवस्य बर्हणा ॥

The Mantra's transliteration in English

akṣāsa id aṅkuśino nitodino nikṛtvānas tapanās tāpayiṣṇavaḥ | kumāradeṣṇā jayataḥ punarhaṇo madhvā sampṛktāḥ kitavasya barhaṇā ||

The Pada Paath (Sanskrit)

अ॒क्षास॑: । इत् । अ॒ङ्कु॒शिन॑: । नि॒ऽतो॒दिन॑: । नि॒ऽकृत्वा॑नः । तप॑नाः । ता॒प॒यि॒ष्णव॑: । कु॒मा॒रऽदे॑ष्णाः । जय॑तः । पु॒नः॒ऽहन॑: । मध्वा॑ । सम्ऽपृ॑क्ताः । कि॒त॒वस्य॑ । ब॒र्हणा॑ ॥

The Pada Paath - transliteration

akṣāsaḥ | it | aṅkuśinaḥ | ni-todinaḥ | ni-kṛtvānaḥ | tapanāḥ | tāpayiṣṇavaḥ | kumāra-deṣṇāḥ | jayataḥ | punaḥ-hanaḥ | madhvā | sam-pṛktāḥ | kitavasya | barhaṇā

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-008

MANTRA NUMBER:

Mantra 8 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 3 of Varga 4 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 52 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

त्रि॒प॒ञ्चा॒शः क्री॑ळति॒ व्रात॑ एषां दे॒व इ॑व सवि॒ता स॒त्यध॑र्मा । उ॒ग्रस्य॑ चिन्म॒न्यवे॒ ना न॑मन्ते॒ राजा॑ चिदेभ्यो॒ नम॒ इत्कृ॑णोति ॥

The Mantra without meters (Sanskrit)

त्रिपञ्चाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा । उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत्कृणोति ॥

The Mantra's transliteration in English

tripañcāśaḥ krīḻati vrāta eṣāṁ deva iva savitā satyadharmā | ugrasya cin manyave nā namante rājā cid ebhyo nama it kṛṇoti ||

The Pada Paath (Sanskrit)

त्रि॒ऽप॒ञ्चा॒शः । क्री॒ळ॒ति॒ । व्रातः॑ । ए॒षा॒म् । दे॒वःऽइ॑व । स॒वि॒ता । स॒त्यऽध॑र्मा । उ॒ग्रस्य॑ । चि॒त् । म॒न्यवे॑ । न । न॒म॒न्ते॒ । राजा॑ । चि॒त् । ए॒भ्यः॒ । नमः॑ । इत् । कृ॒णो॒मि॒ ॥

The Pada Paath - transliteration

tri-pañcāśaḥ | krīḻati | vrātaḥ | eṣām | devaḥ-iva | savitā | satya-dharmā | ugrasya | cit | manyave | na | namante | rājā | cit | ebhyaḥ | namaḥ | it | kṛṇomi

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-009

MANTRA NUMBER:

Mantra 9 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 4 of Varga 4 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 53 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकृषिप्रशंसा

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

नी॒चा व॑र्तन्त उ॒परि॑ स्फुरन्त्यह॒स्तासो॒ हस्त॑वन्तं सहन्ते । दि॒व्या अङ्गा॑रा॒ इरि॑णे॒ न्यु॑प्ताः शी॒ताः सन्तो॒ हृद॑यं॒ निर्द॑हन्ति ॥

The Mantra without meters (Sanskrit)

नीचा वर्तन्त उपरि स्फुरन्त्यहस्तासो हस्तवन्तं सहन्ते । दिव्या अङ्गारा इरिणे न्युप्ताः शीताः सन्तो हृदयं निर्दहन्ति ॥

The Mantra's transliteration in English

nīcā vartanta upari sphuranty ahastāso hastavantaṁ sahante | divyā aṅgārā iriṇe nyuptāḥ śītāḥ santo hṛdayaṁ nir dahanti ||

The Pada Paath (Sanskrit)

नी॒चाः । व॒र्त॒न्ते॒ । उ॒परि॑ । स्फु॒र॒न्ति॒ । अ॒ह॒स्तासः॑ । हस्त॑ऽवन्तम् । स॒ह॒न्ते॒ । दि॒व्याः । अङ्गा॑राः । इरि॑णे । निऽउ॑प्ताः । शी॒ताः । सन्तः॑ । हृद॑यम् । निः । द॒ह॒न्ति॒ ॥

The Pada Paath - transliteration

nīcāḥ | vartante | upari | sphuranti | ahastāsaḥ | hasta-vantam | sahante | divyāḥ | aṅgārāḥ | iriṇe | ni-uptāḥ | śītāḥ | santaḥ | hṛdayam | niḥ | dahanti

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-010

MANTRA NUMBER:

Mantra 10 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 5 of Varga 4 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 54 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

जा॒या त॑प्यते कित॒वस्य॑ ही॒ना मा॒ता पु॒त्रस्य॒ चर॑तः॒ क्व॑ स्वित् । ऋ॒णा॒वा बिभ्य॒द्धन॑मि॒च्छमा॑नो॒ऽन्येषा॒मस्त॒मुप॒ नक्त॑मेति ॥

The Mantra without meters (Sanskrit)

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरतः क्व स्वित् । ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति ॥

The Mantra's transliteration in English

jāyā tapyate kitavasya hīnā mātā putrasya carataḥ kva svit | ṛṇāvā bibhyad dhanam icchamāno 'nyeṣām astam upa naktam eti ||

The Pada Paath (Sanskrit)

जा॒या । त॒प्य॒ते॒ । कि॒त॒वस्य॑ । ही॒ना । मा॒ता । पु॒त्रस्य॑ । चर॑तः । क्व॑ । स्वि॒त् । ऋ॒ण॒ऽवा । बि॒भ्य॒त् । धन॑म् । इ॒च्छमा॑नः । अ॒न्येषा॑म् । अस्त॑म् । उप॑ । नक्त॑म् । ए॒ति॒ ॥

The Pada Paath - transliteration

jāyā | tapyate | kitavasya | hīnā | mātā | putrasya | carataḥ | kva | svit | ṛṇa-vā | bibhyat | dhanam | icchamānaḥ | anyeṣām | astam | upa | naktam | eti

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-011

MANTRA NUMBER:

Mantra 11 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 1 of Varga 5 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 55 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम् । पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरन्ते वृषलः पपाद ॥

The Mantra without meters (Sanskrit)

स्त्रियं दृष्ट्वाय कितवं ततापान्येषां जायां सुकृतं च योनिम् । पूर्वाह्णे अश्वान्युयुजे हि बभ्रून्त्सो अग्नेरन्ते वृषलः पपाद ॥

The Mantra's transliteration in English

striyaṁ dṛṣṭvāya kitavaṁ tatāpānyeṣāṁ jāyāṁ sukṛtaṁ ca yonim | pūrvāhṇe aśvān yuyuje hi babhrūn so agner ante vṛṣalaḥ papāda ||

The Pada Paath (Sanskrit)

स्त्रियम् । दृष्ट्वाय । कितवम् । ततापु । अन्येषाम् । जायाम् । सुऽकृतम् । च । योनिम् । पूर्वाह्णे । अश्वान् । युयुजे । हि । बभ्रून् । सः । अग्नेः । अन्ते । वृषलः । पपाद ॥

The Pada Paath - transliteration

striyam | dṛṣṭavāya | kitavam | tatāpa | anyeṣām | jāyām | su-kṛtam | ca | yonim | pūrvāhṇe | aśvān | yuyuje | hi | babhrūn | saḥ | agneḥ | ante | vṛṣalaḥ | papāda

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-012

MANTRA NUMBER:

Mantra 12 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 2 of Varga 5 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 56 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकृषिप्रशंसा

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव । तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥

The Mantra without meters (Sanskrit)

यो वः सेनानीर्महतो गणस्य राजा व्रातस्य प्रथमो बभूव । तस्मै कृणोमि न धना रुणध्मि दशाहं प्राचीस्तदृतं वदामि ॥

The Mantra's transliteration in English

yo vaḥ senānīr mahato gaṇasya rājā vrātasya prathamo babhūva | tasmai kṛṇomi na dhanā ruṇadhmi daśāham prācīs tad ṛtaṁ vadāmi ||

The Pada Paath (Sanskrit)

यः । वः । सेनाऽनीः । महतः । गणस्य । राजा । व्रातस्य । प्रथमः । बभूव । तस्मै । कृणोमि । न । धना । रुणध्मि । दश । अहम् । प्राचीः । तत् । ऋतम् । वदामि ॥

The Pada Paath - transliteration

yaḥ | vaḥ | senānīḥ | mahataḥ | gaṇasya | rājā | vrātasya | prathamaḥ | babhūva | tasmai | kṛṇomi | na | dhanā | ruṇadhmi | daśa | aham | prācīḥ | tat | ṛtam | vadāmi

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-013

MANTRA NUMBER:

Mantra 13 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 3 of Varga 5 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 57 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकृषिप्रशंसा

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒क्षैर्मा दी॑व्यः कृ॒षिमित्कृ॑षस्व वि॒त्ते र॑मस्व ब॒हु मन्य॑मानः । तत्र॒ गाव॑: कितव॒ तत्र॑ जा॒या तन्मे॒ वि च॑ष्टे सवि॒तायम॒र्यः ॥

The Mantra without meters (Sanskrit)

अक्षैर्मा दीव्यः कृषिमित्कृषस्व वित्ते रमस्व बहु मन्यमानः । तत्र गावः कितव तत्र जाया तन्मे वि चष्टे सवितायमर्यः ॥

The Mantra's transliteration in English

akṣair mā dīvyaḥ kṛṣim it kṛṣasva vitte ramasva bahu manyamānaḥ | tatra gāvaḥ kitava tatra jāyā tan me vi caṣṭe savitāyam aryaḥ ||

The Pada Paath (Sanskrit)

अ॒क्षैः । मा । दी॒व्य॒ह् । कृ॒षिम् । इत् । कृ॒ष॒स्व॒ । वि॒त्ते । र॒म॒स्व॒ । ब॒हु । मन्य॑मानः । तत्र॑ । गाव॑ः । कि॒त॒व॒ । तत्र॑ । जा॒या । तत् । मे॒ । वि । च॒ष्टे॒ । स॒वि॒ता । अ॒यम् । अ॒र्यः ॥

The Pada Paath - transliteration

akṣaiḥ | mā | dīvyah | kṛṣim | it | kṛṣasva | vitte | ramasva | bahu | manyamānaḥ | tattra | gāvaḥ | kitava | tatra | jāyā | tat | me | vi | caṣṭe | savitā | ayam | aryaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-034/mantra-rig-10-034-014

MANTRA NUMBER:

Mantra 14 of Sukta 34 of Mandal 10 of Rig Veda
Mantra 4 of Varga 5 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 58 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- कवष ऐलूष अक्षो वा मौजवान्

देवता (Devataa) :- अक्षकितवनिन्दा

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

मि॒त्रं कृ॑णुध्वं॒ खलु॑ मृ॒ळता॑ नो॒ मा नो॑ घो॒रेण॑ चरता॒भि धृ॒ष्णु । नि वो॒ नु म॒न्युर्वि॑शता॒मरा॑तिर॒न्यो ब॑भ्रू॒णां प्रसि॑तौ॒ न्व॑स्तु ॥

The Mantra without meters (Sanskrit)

मित्रं कृणुध्वं खलु मृळता नो मा नो घोरेण चरताभि धृष्णु । नि वो नु मन्युर्विशतामरातिरन्यो बभ्रूणां प्रसितौ न्वस्तु ॥

The Mantra's transliteration in English

mitraṁ kṛṇudhvaṁ khalu mṛḻatā no mā no ghoreṇa caratābhi dhṛṣṇu | ni vo nu manyur viśatām arātir anyo babhrūṇām prasitau nv astu ||

The Pada Paath (Sanskrit)

मि॒त्रम् । कृ॒णु॒ध्व॒म् । खलु॑ । मृ॒ळत॑ । नः॒ । मा । नः॒ । घो॒रेण॑ । च॒र॒त॒ । अ॒भि । धृ॒ष्णु । नि । वः॒ । नु । म॒न्युः । वि॒श॒ता॒म् । अरा॑तिः । अ॒न्यः । ब॒भ्रू॒णाम् । प्रऽसि॑तौ । नु । अ॒स्तु ॥

The Pada Paath - transliteration

mitram | kṛṇudhvam | khalu | mṛḻata | naḥ | mā | naḥ | ghoreṇa | carata | abhi | dhṛṣṇu | ni | vaḥ | nu | manyuḥ | viśatām | arātiḥ | anyaḥ | babhrūṇām | pra-sitau | nu | astu

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-001

MANTRA NUMBER:

Mantra 1 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 1 of Varga 6 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 59 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः
देवता (Devataa) :- विश्वेदेवा:
छन्द: (Chhand) :- विराड्जगती
स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अबु॑ध्रमु॒ त्य इन्द्र॑वन्तो अ॒ग्नयो॒ ज्योति॒र्भर॑न्त उ॒षसो॒ व्यु॑ष्टिषु । म॒ही द्यावा॑पृथि॒वी चे॑तता॒मपो॒ऽद्या दे॒वाना॒मव॒ आ वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

अबुध्रमु त्य इन्द्रवन्तो अग्नयो ज्योतिर्भरन्त उषसो व्युष्टिषु । मही द्यावापृथिवी चेततामपोऽद्या देवानामव आ वृणीमहे ॥

The Mantra's transliteration in English

abudhram u tya indravanto agnayo jyotir bharanta uṣaso vyuṣṭiṣu | mahī dyāvāpṛthivī cetatām apo 'dyā devānām ava ā vṛṇīmahe ||

The Pada Paath (Sanskrit)

अबु॑ध्रम् । ऊँ॒ इति॑ । त्ये । इन्द्र॑ऽवन्तः । अ॒ग्नयः॑ । ज्योतिः॑ । भर॑न्तः । उ॒षसः॑ । वि॒ऽउ॑ष्टिषु । म॒ही इति॑ । द्यावा॑पृथि॒वी इति॑ । चे॒त॒ता॒म् । अपः॑ । अ॒द्य । दे॒वाना॑म् । अवः॑ । आ । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

abudhram | oṃ iti | tye | indra-vantaḥ | agnayaḥ | jyotiḥ | bharantaḥ | uṣasaḥ | vi-uṣṭiṣu | mahī iti | dyāvāpṛthivī iti | cetatām | apaḥ | adya | devānām | avaḥ | ā | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-002

MANTRA NUMBER:

Mantra 2 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 2 of Varga 6 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 60 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- भुरिग्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

दि॒वस्पृ॑थि॒व्योरव॒ आ वृ॑णीमहे मा॒तॄन्त्सिन्धू॒न्पर्व॑ताञ्छर्य॒णाव॑तः । अ॒ना॒गा॒स्त्वं सूर्य॑मु॒षास॑मीमहे भ॒द्रं सोम॑: सुवा॒नो अ॒द्या कृ॑णोतु नः ॥

The Mantra without meters (Sanskrit)

दिवस्पृथिव्योरव आ वृणीमहे मातॄन्त्सिन्धून्पर्वताञ्छर्यणावतः । अनागास्त्वं सूर्यमुषासमीमहे भद्रं सोमः सुवानो अद्या कृणोतु नः ॥

The Mantra's transliteration in English

divaspṛthivyor ava ā vṛṇīmahe mātṝn sindhūn parvatāñ charyaṇāvataḥ | anāgāstvaṁ sūryam uṣāsam īmahe bhadraṁ somaḥ suvāno adyā kṛṇotu naḥ ||

The Pada Paath (Sanskrit)

दि॒वःपृ॑थि॒व्योः । अव॑ः । आ । वृ॒णी॒म॒हे॒ । मा॒तॄन् । सिन्धू॑न् । पर्व॑तान् । श॒र्य॒णाऽव॑तः । अ॒ना॒गाः॒ऽत्वम् । सू॒र्य॑म् । उ॒षस॑म् । ई॒म॒हे॒ । भ॒द्रम् । सोम॑ः । सु॒वा॒नः । अ॒द्य । कृ॒णो॒तु॒ । न॒ः ॥

The Pada Paath - transliteration

divaḥpṛthivyoḥ | avaḥ | ā | vṛṇīmahe | mātṝn | sindhūn | parvatān | śaryaṇāvataḥ | anāgāḥ-tvam | sūryam | uṣasam | īmahe | bhadram | somaḥ | suvānaḥ | adya | kṛṇotu | naḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-003

MANTRA NUMBER:

Mantra 3 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 3 of Varga 6 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 61 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- पादनिचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

द्यावा॒ नो अ॒द्य पृ॑थि॒वी अना॑गसो म॒ही त्रा॑येतां सु॒वि॒ताय॑ मा॒तरा॑ । उ॒षा उ॒च्छन्त्यप॑ बाधताम॒घं स्व॒स्त्य१॒॑ग्निं स॑मिधा॒नमी॑महे ॥

The Mantra without meters (Sanskrit)

द्यावा नो अद्य पृथिवी अनागसो मही त्रायेतां सुविताय मातरा । उषा उच्छन्त्यप बाधतामघं स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

dyāvā no adya pṛthivī anāgaso mahī trāyetāṁ suvitāya mātarā | uṣā ucchanty apa bādhatām aghaṁ svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

द्यावा॑ । न॒ः । अ॒द्य । पृ॒थि॒वी इति॑ । अना॑गसः । म॒ही इति॑ । त्रा॒ये॒ता॒म् । सु॒वि॒ताय॑ । मा॒तरा॑ । उ॒षाः । उ॒च्छन्ती॑ । अप॑ । बा॒ध॒ता॒म् । अ॒घम् । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

dyāvā | naḥ | adya | pṛthivī iti | anāgasaḥ | mahī iti | trāyetām | suvitāya | mātarā | uṣāḥ | ucchantī | apa | bādhatām | agham | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-004

MANTRA NUMBER:
Mantra 4 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 4 of Varga 6 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 62 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराडार्चीजगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒यं न॑ उ॒स्रा प्र॑थ॒मा सु॑दे॒व्यं॑ रे॒वत्स॒निभ्यो॑ रे॒वती॑ व्यु॑च्छतु । आ॒रे म॒न्युं दु॑र्वि॒दत्र॑स्य धीमहि स्व॒स्त्य१॒॑ग्निं स॑मिधा॒नमी॑महे ॥

The Mantra without meters (Sanskrit)

इयं न उस्रा प्रथमा सुदेव्यं रेवत्सनिभ्यो रेवती व्युच्छतु । आरे मन्युं दुर्विदत्रस्य धीमहि स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

iyaṁ na usrā prathamā sudevyaṁ revat sanibhyo revatī vy ucchatu | āre manyuṁ durvidatrasya dhīmahi svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

इ॒यम् । नः॒ । उ॒स्रा । प्र॒थ॒मा । सु॒ऽदे॒व्य॑म् । रे॒वत् । स॒निऽभ्यः॑ । रे॒वती॑ । वि । उ॑च्छतु । आ॒रे । म॒न्युम् । दुः॒ऽवि॒दत्र॑स्य । धी॒म॒हि॒ । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

iyam | naḥ | usrā | prathamā | su-devyam | revat | sani-bhyaḥ | revatī | vi | ucchatu | āre | manyum | duḥ-vidatrasya | dhīmahi | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-005

MANTRA NUMBER:

Mantra 5 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 5 of Varga 6 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 63 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- भुरिगार्चीजगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु । भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्य१ग्निं समिधानमीमहे ॥

The Mantra without meters (Sanskrit)

प्र याः सिस्रते सूर्यस्य रश्मिभिर्ज्योतिर्भरन्तीरुषसो व्युष्टिषु । भद्रा नो अद्य श्रवसे व्युच्छत स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

pra yāḥ sisrate sūryasya raśmibhir jyotir bharantīr uṣaso vyuṣṭiṣu | bhadrā no adya śravase vy ucchata svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

प्र । याः । सिस्रते । सूर्यस्य । रश्मिऽभिः । ज्योतिः । भरन्तीः । उषसः । विऽउष्टिषु । भद्राः । नः । अद्य । श्रवसे । वि । उच्छत । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥

The Pada Paath - transliteration

pra | yāḥ | sisrate | sūryasya | raśmi-bhiḥ | jyotiḥ | bharantīḥ | uṣasaḥ | vi-uṣṭiṣu | bhadrāḥ | naḥ | adya | śravase | vi | ucchata | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-006

MANTRA NUMBER:

Mantra 6 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 1 of Varga 7 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 64 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒न॒मी॒वा उ॒षस॒ आ च॑रन्तु न॒ उद॒ग्नयौ जिहतां॒ ज्योति॑षा बृ॒हत् । आयु॑क्षाताम॒श्विना॒ तूतु॑जिं॒ रथं॑ स्व॒स्त्य१॒॑ग्निं स॑मिधा॒नमीमहे ॥

The Mantra without meters (Sanskrit)

अनमीवा उषस आ चरन्तु न उदग्नयो जिहतां ज्योतिषा बृहत् । आयुक्षातामश्विना तूतुजिं रथं स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

anamīvā uṣasa ā carantu na ud agnayo jihatāṁ jyotiṣā bṛhat | āyukṣātām aśvinā tūtujiṁ rathaṁ svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

अ॒न॒मी॒वाः । उ॒षसः॑ । आ । च॒र॒न्तु॒ । नः॒ । उत् । अ॒ग्नयः॑ । जि॒ह॒ता॒म् । ज्योति॑षा । बृ॒हत् । अयु॑क्षाताम् । अ॒श्विना॑ । तूतु॑जिम् । रथ॑म् । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

anamīvāḥ | uṣasaḥ | ā | carantu | naḥ | ut | agnayaḥ | jihatām | jyotiṣā | bṛhat | ayukṣātām | aśvinā | tūtujim | ratham | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-007

MANTRA NUMBER:

Mantra 7 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 2 of Varga 7 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 65 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- पादनिचृज्ज्गती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि । रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्य१ग्निं समिधानमीमहे ॥

The Mantra without meters (Sanskrit)

श्रेष्ठं नो अद्य सवितर्वरेण्यं भागमा सुव स हि रत्नधा असि । रायो जनित्रीं धिषणामुप ब्रुवे स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

śreṣṭhaṁ no adya savitar vareṇyam bhāgam ā suva sa hi ratnadhā asi | rāyo janitrīṁ dhiṣaṇām upa bruve svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

श्रेष्ठम् । नः । अद्य । सवितः । वरेण्यम् । भागम् । आ । सुव । सः । हि । रत्नऽधाः । असि । रायः । जनित्रीन् । धिषणाम् । उप । ब्रुवे । स्वस्ति । अग्निम् । सम्ऽइधानम् । ईमहे ॥

The Pada Paath - transliteration

śreṣṭham | naḥ | adya | savitaḥ | vareṇyam | bhāgam | ā | suva | saḥ | hi | ratna-dhāḥ | asi | rāyaḥ | janitrīn | dhiṣaṇām | upa | bruve | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-008

MANTRA NUMBER:

Mantra 8 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 3 of Varga 7 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 66 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराडार्चीजगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या३ अमन्महि । विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्य१ग्निं समिधानमीमहे ॥

The Mantra without meters (Sanskrit)

पिपर्तु मा तदृतस्य प्रवाचनं देवानां यन्मनुष्या अमन्महि । विश्वा इदुस्राः स्पळुदेति सूर्यः स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

pipartu mā tad ṛtasya pravācanaṁ devānāṁ yan manuṣyā amanmahi | viśvā id usrāḥ spaḻ ud eti sūryaḥ svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

पिपर्तु । मा । तत् । ऋतस्य । प्रऽवाचनम् । देवानाम् । यत् । मनुष्याः । अमन्महि । विश्वाः । इत् । उस्राः । स्पट् । उत् । एति । सूर्यः । स्वस्ति । अग्निम् । समऽइधानम् । ईमहे ॥

The Pada Paath - transliteration

pipartu | mā | tat | ṛtasya | pra-vācanam | devānām | yat | manuṣyāḥ | amanmahi | viśvāḥ | it | usrāḥ | spaṭ | ut | eti | sūryaḥ | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-009

MANTRA NUMBER:

Mantra 9 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 4 of Varga 7 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 67 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒द्वे॒षो अ॒द्य ब॒र्हिष॒: स्तरी॑मणि॒ ग्राव्णां॒ योगे॒ मन्म॑न॒: साध॑ ईमहे । आ॒दि॒त्यानां॒ शर्म॑णि॒ स्था भु॑रण्यसि स्व॒स्त्य१॒॑ग्निं स॑मिधा॒नमी॑महे ॥

The Mantra without meters (Sanskrit)

अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे । आदित्यानां शर्मणि स्था भुरण्यसि स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

adveṣo adya barhiṣaḥ starīmaṇi grāvṇāṁ yoge manmanaḥ sādha īmahe | ādityānāṁ śarmaṇi sthā bhuraṇyasi svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

अ॒द्वे॒षः । अ॒द्य । ब॒र्हिषः॑ । स्तरी॑मणि । ग्राव्णा॑म् । योगे॑ । मन्म॑नः । साधे॑ । ई॒म॒हे॒ । आ॒दि॒त्याना॑म् । शर्म॑णि । स्थाः । भु॒र॒ण्य॒सि॒ । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

adveṣaḥ | adya | barhiṣaḥ | starīmaṇi | grāvṇām | yoge | manmanaḥ | sādhe | īmahe | ādityānām | śarmaṇi | sthāḥ | bhuraṇyasi | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-010

MANTRA NUMBER:

Mantra 10 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 5 of Varga 7 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 68 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- पादनिचृज्ज्गती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

आ नो॑ ब॒र्हिः स॒ध॒मादे॑ बृ॒हद्दि॒वि दे॒वाँ ईळे॑ सा॒दया॑ स॒प्त होतॄ॑न् । इन्द्रं॑ मि॒त्रं वरु॑णं सा॒तये॒ भगं॑ स्व॒स्त्य१॒॑ग्निं स॑मिधा॒नमी॑महे ॥

The Mantra without meters (Sanskrit)

आ नो बर्हिः सधमादे बृहद्दिवि देवाँ ईळे सादया सप्त होतॄन् । इन्द्रं मित्रं वरुणं सातये भगं स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

ā no barhiḥ sadhamāde bṛhad divi devām̐ īḻe sādayā sapta hotṝn | indram mitraṁ varuṇaṁ sātaye bhagaṁ svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

आ । नः॒ । ब॒र्हिः । स॒ध॒ऽमादे॑ । बृ॒हत् । दि॒वि । दे॒वान् । ई॒ळे॒ । सा॒दय॑ । स॒प्त । होतॄ॑न् । इन्द्र॑म् । मि॒त्रम् । वरु॑णम् । सा॒तये॑ । भग॑म् । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

ā | naḥ | barhiḥ | sadha-māde | bṛhat | divi | devān | īḻe | sādaya | sapta | hotṝn | indram | mitram | varuṇam | sātaye | bhagam | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-011

MANTRA NUMBER:
Mantra 11 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 1 of Varga 8 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 69 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त आ॑दि॒त्या आ ग॑ता स॒र्वता॑तये वृ॒धे नौ॑ य॒ज्ञम॑वता सजोषसः । बृह॒स्पतिं॑ पू॒षण॑म॒श्विना॒ भगं॑ स्व॒स्त्य१॒॑ग्निं स॒मिधा॒नमी॑महे ॥

The Mantra without meters (Sanskrit)

त आदित्या आ गता सर्वतातये वृधे नो यज्ञमवता सजोषसः । बृहस्पतिं पूषणमश्विना भगं स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

ta ādityā ā gatā sarvatātaye vṛdhe no yajñam avatā sajoṣasaḥ | bṛhaspatim pūṣaṇam aśvinā bhagaṁ svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

ते । आ॒दि॒त्याः॒ । आ । ग॒त॒ । स॒र्वता॑तये । वृ॒धे । नः॒ । य॒ज्ञम् । अ॒व॒त॒ । स॒ऽजो॒ष॒सः॒ । बृह॒स्पति॑म् । पू॒षण॑म् । अ॒श्विना॑ । भग॑म् । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

te | ādityāḥ | ā | gata | sarvatātaye | vṛdhe | naḥ | yajñam | avata | sa-joṣasaḥ | bṛhaspatim | pūṣaṇam | aśvinā | bhagam | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-012

MANTRA NUMBER:

Mantra 12 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 2 of Varga 8 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 70 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- पादनिचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

तन्नो॑ देवा यच्छत सुप्रवाच॒नं छ॒र्दिरा॑दित्याः सु॒भरं॑ नृ॒पाय्यं॑म् । पश्वे॑ तो॒काय॒ तनं॑याय जी॒वसे॑ स्व॒स्त्य१॒॑ग्निं स॑मिधा॒नमी॑महे ॥

The Mantra without meters (Sanskrit)

तन्नो देवा यच्छत सुप्रवाचनं छर्दिरादित्याः सुभरं नृपाय्यम् । पश्वे तोकाय तनयाय जीवसे स्वस्त्यग्निं समिधानमीमहे ॥

The Mantra's transliteration in English

tan no devā yacchata supravācanaṁ chardir ādityāḥ subharaṁ nṛpāyyam | paśve tokāya tanayāya jīvase svasty agniṁ samidhānam īmahe ||

The Pada Paath (Sanskrit)

तत् । नः॒ । दे॒वाः॒ । य॒च्छ॒त॒ । सु॒ऽप्र॒वा॒च॒नम् । छ॒र्दिः । आ॒दि॒त्याः॒ । सु॒ऽभरं॑म् । नृ॒ऽपाय्यं॑म् । पश्वे॑ । तो॒काय॑ । तनं॑याय । जी॒वसे॑ । स्व॒स्ति । अ॒ग्निम् । स॒म्ऽइ॒धा॒नम् । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

tat | naḥ | devāḥ | yacchata | su-pravācanam | chardiḥ | ādityāḥ | su-bharam | nṛ-pāyyam | paśve | tokāya | tanayāya | jīvase | svasti | agnim | sam-idhānam | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-013

MANTRA NUMBER:

Mantra 13 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 3 of Varga 8 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 71 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

विश्वे॑ अ॒द्य म॒रुतो॒ विश्व॑ ऊ॒ती विश्वे॑ भवन्त्व॒ग्नय॒: समि॑द्धाः । विश्वे॑ नो दे॒वा अव॒सा ग॑मन्तु॒ विश्व॑मस्तु॒ द्रवि॑णं॒ वाजो॑ अ॒स्मे ॥

The Mantra without meters (Sanskrit)

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः । विश्वे नो देवा अवसा गमन्तु विश्वमस्तु द्रविणं वाजो अस्मे ॥

The Mantra's transliteration in English

viśve adya maruto viśva ūtī viśve bhavantv agnayaḥ samiddhāḥ | viśve no devā avasā gamantu viśvam astu draviṇaṁ vājo asme ||

The Pada Paath (Sanskrit)

विश्वे॑ । अ॒द्य । म॒रुत॑: । विश्वे॑ । ऊ॒ती । विश्वे॑ । भ॒व॒न्तु॒ । अ॒ग्नय॑: । सम्ऽइ॑द्धाः । विश्वे॑ । न॒: । दे॒वाः । अ॒व॒सा । आ । ग॒म॒न्तु॒ । विश्व॑म् । अ॒स्तु॒ । द्रवि॑णम् । वाज॑: । अ॒स्मे इति॑ ॥

The Pada Paath - transliteration

viśve | adya | marutaḥ | viśve | ūtī | viśve | bhavantu | agnayaḥ | sam-iddhāḥ | vi śve | naḥ | devāḥ | avasā | ā | gamantu | viśvam | astu | draviṇam | vājaḥ | asme iti

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-035/mantra-rig-10-035-014

MANTRA NUMBER:

Mantra 14 of Sukta 35 of Mandal 10 of Rig Veda
Mantra 4 of Varga 8 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 72 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः । यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥

The Mantra without meters (Sanskrit)

यं देवासोऽवथ वाजसातौ यं त्रायध्वे यं पिपृथात्यंहः । यो वो गोपीथे न भयस्य वेद ते स्याम देववीतये तुरासः ॥

The Mantra's transliteration in English

yaṁ devāso 'vatha vājasātau yaṁ trāyadhve yam piprthāty aṁhaḥ | yo vo gopīthe na bhayasya veda te syāma devavītaye turāsaḥ ||

The Pada Paath (Sanskrit)

यम् । देवासः । अवथ । वाजऽसातौ । यम् । त्रायध्वे । यम् । पिपृथ । अति । अंहः । यः । वः । गोऽपीथे । न । भयस्य । वेद । ते । स्याम । देवऽवीतये । तुरासः ॥

The Pada Paath - transliteration

yam | devāsaḥ | avatha | vāja-sātau | yam | trāyadhve | yam | piprtha | ati | aṃhaḥ | yaḥ | vaḥ | go--pīthe | na | bhayasya | veda | te | syāma | deva-vītaye | turāsaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-001

MANTRA NUMBER:

Mantra 1 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 1 of Varga 9 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 73 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा । इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ॥

The Mantra without meters (Sanskrit)

उषासानक्ता बृहती सुपेशसा द्यावाक्षामा वरुणो मित्रो अर्यमा । इन्द्रं हुवे मरुतः पर्वताँ अप आदित्यान्द्यावापृथिवी अपः स्वः ॥

The Mantra's transliteration in English

uṣāsānaktā bṛhatī supeśasā dyāvākṣāmā varuṇo mitro aryamā | indraṁ huve marutaḥ parvatām̐ apa ādityān dyāvāpṛthivī apaḥ svaḥ ||

The Pada Paath (Sanskrit)

उषसानक्ता । बृहती इति । सुऽपेशसा । द्यावाक्षामा । वरुणः । मित्रः । अर्यमा । इन्द्रम् । हुवे । मरुतः । पर्वतान् । अपः । आदित्यान् । द्यावापृथिवी इति । अपः । स्व□रिति स्वः ॥

The Pada Paath - transliteration

uṣasānaktā | bṛhatī iti | su-peśasā | dyāvākṣāmā | varuṇaḥ | mitraḥ | aryamā | indram | huve | marutaḥ | parvatān | apaḥ | ādityān | dyāvāpṛthivī iti | apaḥ | svar iti svaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-002

MANTRA NUMBER:

Mantra 2 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 2 of Varga 9 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 74 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

द्यौश्च॑ नः पृथि॒वी च॒ प्रचे॑तस ऋ॒ताव॑री रक्षता॒मंह॑सो रि॒षः । मा दु॒र्वि॒दत्रा॒ निर्ऋ॑तिर्न ईशत॒ तद्दे॒वाना॒मवो॑ अ॒द्या वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसो रिषः । मा दुर्विदत्रा निर्ऋतिर्न ईशत तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

dyauś ca naḥ pṛthivī ca pracetasa ṛtāvarī rakṣatām aṁhaso riṣaḥ | mā durvidatrā nirṛtir na īśata tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

द्यौः । च॒ । न॒ः । पृ॒थि॒वी । च॒ । प्रऽचे॑तसा । ऋ॒तव॑री॒ इत्यृ॒तऽव॑री । र॒क्ष॒ता॒म् । अंह॑सः । रि॒षः । मा । दुः॒ऽवि॒दत्रा॑ । निःऽऋ॑तिः । न॒ः । ई॒श॒त॒ । तत् । दे॒वाना॑म् । अव॑ः । अ॒द्य । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

dyauḥ | ca | naḥ | pṛthivī | ca | pra-cetasā | ṛtavarī ity ṛta-varī | rakṣatām | aṃhasaḥ | riṣaḥ | mā | duḥ-vidatrā | nr-ṛtiḥ | naḥ | īśata | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-003

MANTRA NUMBER:

Mantra 3 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 3 of Varga 9 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 75 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः । स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra without meters (Sanskrit)

विश्वस्मान्नो अदितिः पात्वंहसो माता मित्रस्य वरुणस्य रेवतः । स्वर्वज्ज्योतिरवृकं नशीमहि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

viśvasmān no aditiḥ pātv aṁhaso mātā mitrasya varuṇasya revataḥ | svarvaj jyotir avṛkaṁ naśīmahi tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

विश्वस्मात् । नः । अदितिः । पातु । अंहसः । माता । मित्रस्य । वरुणस्य । रेवतः । स्वःऽवत् । ज्योतिः । अवृकम् । नशीमहि । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥

The Pada Paath - transliteration

viśvasmāt | naḥ | aditiḥ | pātu | aṃhasaḥ | mātā | mitrasya | varuṇasya | revataḥ | svaḥ-vat | jyotiḥ | avṛkam | naśīmahi | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-004

MANTRA NUMBER:

Mantra 4 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 4 of Varga 9 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 76 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ग्रावा॒ वद॒न्नप॒ रक्षां॑सि सेधतु दु॒ष्ष्वप्न्यं॒ निर्ऋ॑तिं॒ विश्व॑म॒त्रिण॑म् । आ॒दि॒त्यं शर्म॑ म॒रुता॑मशीमहि॒ तद्दे॒वाना॒मवो॑ अ॒द्या वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

ग्रावा वदन्नप रक्षांसि सेधतु दुष्ष्वप्न्यं निर्ऋतिं विश्वमत्रिणम् । आदित्यं शर्म मरुतामशीमहि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

grāvā vadann apa rakṣāṁsi sedhatu duṣṣvapnyaṁ nirṛtiṁ viśvam atriṇam | ādityaṁ śarma marutām aśīmahi tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

ग्रावा॑ । वद॑न् । अप॑ । रक्षां॑सि । से॒ध॒तु॒ । दुः॒ऽस्वप्न्य॑म् । निःऽऋ॑तिम् । विश्व॑म् । अ॒त्रिण॑म् । आ॒दि॒त्यम् । शर्म॑ । म॒रुता॑म् । अ॒शी॒म॒हि॒ । तत् । दे॒वाना॑म् । अवः॑ । अ॒द्य । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

grāvā | vadan | apa | rakṣāṃsi | sedhatu | duḥ-svapnyam | niḥ-ṛtim | viśvam | atriṇam | ādityam | śarma | marutām | aśīmahi | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-005

MANTRA NUMBER:

Mantra 5 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 5 of Varga 9 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 77 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

एन्द्रो॑ ब॒र्हिः सीद॑तु॒ पिन्व॑ता॒मिळा॒ बृह॒स्पति॒: साम॑भिर्ऋ॒क्वो अ॑र्चतु । सु॒प्र॒के॒तं जी॒वसे॒ मन्म॑ धीमहि तद्दे॒वाना॒मवो॑ अ॒द्या वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

एन्द्रो बर्हिः सीदतु पिन्वतामिळा बृहस्पतिः सामभिर्ऋक्वो अर्चतु । सुप्रकेतं जीवसे मन्म धीमहि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

endro barhiḥ sīdatu pinvatām iḻā bṛhaspatiḥ sāmabhir ṛkvo arcatu | supraketaṁ jīvase manma dhīmahi tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

आ । इन्द्रः॑ । ब॒र्हिः । सीद॑तु । पिन्व॑ताम् । इळा॑ । बृह॒स्पतिः॑ । साम॑ऽभिः । ऋ॒क्वः । अ॒र्च॒तु । सु॒ऽप्र॒के॒तम् । जी॒वसे॑ । मन्म॑ । धी॒म॒हि॒ । तत् । दे॒वाना॑म् । अवः॑ । अ॒द्य । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

ā | indraḥ | barhiḥ | sīdatu | pinvatām | iḻā | bṛhaspatiḥ | sāma-bhiḥ | ṛkvaḥ | arcatu | su-praketam | jīvase | manma | dhīmahi | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-006

MANTRA NUMBER:

Mantra 6 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 1 of Varga 10 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 78 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

दि॒वि॒स्पृशं॑ य॒ज्ञम॒स्माक॑मश्विना जी॒राध्व॑रं कृणुतं सु॒म्नमि॒ष्टये॑ । प्रा॒चीन॑रश्मि॒माहु॑तं घृ॒तेन॒ तद्दे॒वाना॒मवो॑ अ॒द्या वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

दिविस्पृशं यज्ञमस्माकमश्विना जीराध्वरं कृणुतं सुम्नमिष्टये । प्राचीनरश्मिमाहुतं घृतेन तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

divispṛśaṁ yajñam asmākam aśvinā jīrādhvaraṁ kṛṇutaṁ sumnam iṣṭaye | prācīnaraśmim āhutaṁ ghṛtena tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

दि॒वि॒ऽस्पृशं॑म् । य॒ज्ञम् । अ॒स्माक॑म् । अ॒श्वि॒ना॒ । जी॒रऽअ॑ध्वरम् । कृ॒णु॒तम् । सु॒म्नम् । इ॒ष्टये॑ । प्रा॒चीन॑ऽरश्मिम् । आऽहु॑तम् । घृ॒तेन॑ । तत् । दे॒वाना॑म् । अवः॑ । अ॒द्य । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

divi-spṛśam | yajñam | asmākam | aśvinā | jīra-adhvaram | kṛṇutam | sumnam | iṣṭaye | prācīna-raśmim | āhutam | ghṛtena | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-007

MANTRA NUMBER:

Mantra 7 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 2 of Varga 10 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 79 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

उप॑ ह्वये सु॒ह॒वं मारु॑तं ग॒णं पा॑व॒कमृ॒ष्वं स॒ख्याय॑ श॒म्भुव॑म् । रा॒यस्पोषं॑ सौश्र॒व॒साय॑ धीमहि॒ तद्दे॒वाना॒मवो॑ अ॒द्या वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

उप ह्वये सुहवं मारुतं गणं पावकमृष्वं सख्याय शम्भुवम् । रायस्पोषं सौश्रवसाय धीमहि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

upa hvaye suhavam mārutaṁ gaṇam pāvakam ṛṣvaṁ sakhyāya śambhuvam | rāyas poṣaṁ sauśravasāya dhīmahi tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

उप॑ । ह्व॒ये॒ । सु॒ऽह॒व॑म् । मारु॑तम् । ग॒णम् । पा॒व॒कम् । ऋ॒ष्वम् । स॒ख्याय॑ । श॒म्ऽभुव॑म् । रा॒यः । पोष॑म् । सौ॒श्र॒व॒साय॑ । धी॒म॒हि॒ । तत् । दे॒वाना॑म् । अवः॑ । अ॒द्य । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

upa | hvaye | su-havam | mārutam | gaṇam | pāvakam | ṛṣvam | sakhyāya | śam-bhuvam | rāyaḥ | poṣam | sauśravasāya | dhīmahi | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-008

MANTRA NUMBER:

Mantra 8 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 3 of Varga 10 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 80 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम् । सुरश्मिं सोममिन्द्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra without meters (Sanskrit)

अपां पेरुं जीवधन्यं भरामहे देवाव्यं सुहवमध्वरश्रियम् । सुरश्मिं सोममिन्द्रियं यमीमहि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

apām peruṁ jīvadhanyam bharāmahe devāvyaṁ suhavam adhvaraśriyam | suraśmiṁ somam indriyaṁ yamīmahi tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

अपाम् । पेरुम् । जीवऽधन्यम् । भरामहे । देवऽअव्यम् । सुऽहवम् । अध्वरऽश्रियम् । सुऽरश्मिम् । सोमम् । इन्द्रियम् । यमीमहि । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥

The Pada Paath - transliteration

apām | perum | jīva-dhanyam | bharāmahe | deva-avyam | su-havam | adhvara-śriyam | su-raśmim | somam | indriyam | yamīmahi | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-009

MANTRA NUMBER:

Mantra 9 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 4 of Varga 10 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 81 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

सनेम तत्सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः । ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ॥

The Mantra without meters (Sanskrit)

सनेम तत्सुसनिता सनित्वभिर्वयं जीवा जीवपुत्रा अनागसः । ब्रह्मद्विषो विष्वगेनो भरेरत तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

sanema tat susanitā sanitvabhir vayaṁ jīvā jīvaputrā anāgasaḥ | brahmadviṣo viṣvag eno bharerata tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

सनेम । तत् । सुऽसनिता । सनित्वऽभिः । वयम् । जीवाः । जीवऽपुत्राः । अनागसः । ब्रह्मऽद्विषः । विष्वक् । एनः । भरेरत । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥

The Pada Paath - transliteration

sanema | tat | su-sanitā | sanitva-bhiḥ | vayam | jīvāḥ | jīva-putrāḥ | anāgasaḥ | brahma-dviṣaḥ | viṣvak | enaḥ | bharerata | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-010

MANTRA NUMBER:

Mantra 10 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 5 of Varga 10 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 82 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ये स्था मनोर्य॒ज्ञियास्ते शृ॑णोतन॒ यद्वो॑ देवा॒ ईम॑हे॒ तद्द॑दातन । जैत्रं॒ क्रतुं॑ र॒यिमद्वी॒रव॒द्यश॒स्तद्दे॒वाना॒मवो॑ अ॒द्या वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन । जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

ye sthā manor yajñiyās te śṛṇotana yad vo devā īmahe tad dadātana | jaitraṁ kratuṁ rayimad vīravad yaśas tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

ये । स्थाः । मनोः॑ । य॒ज्ञियाः॑ । ते । शृ॒णो॒त॒न॒ । यत् । व॒ः । दे॒वाः॒ । ईम॑हे । तत् । द॒दा॒त॒न॒ । जैत्र॑म् । क्रतु॑म् । र॒यि॒मत् । वी॒रऽव॑त् । यशः॑ । तत् । दे॒वाना॑म् । अवः॑ । अ॒द्य । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

ye | sthāḥ | manoḥ | yajñiyāḥ | te | śṛṇotana | yat | vaḥ | devāḥ | īmahe | tat | dadātana | jaitram | kratum | rayimat | vīra-vat | yaśaḥ | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-011

MANTRA NUMBER:

Mantra 11 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 1 of Varga 11 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 83 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

म॒हद॒द्य म॑ह॒तामा वृ॑णीम॒हेऽवो॑ दे॒वानां॑ बृह॒ताम॑न॒र्वणा॑म् । यथा॒ वसु॑ वी॒रजा॑तं॒ नशा॑महै॒ तद्दे॒वाना॒मवो॑ अ॒द्या वृ॑णीमहे ॥

The Mantra without meters (Sanskrit)

महदद्य महतामा वृणीमहेऽवो देवानां बृहतामनर्वणाम् । यथा वसु वीरजातं नशामहै तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

mahad adya mahatām ā vṛṇīmahe 'vo devānām bṛhatām anarvaṇām | yathā vasu vīrajātaṁ naśāmahai tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

म॒हत् । अ॒द्य । म॒ह॒ताम् । आ । वृ॒णी॒म॒हे॒ । अवः॑ । दे॒वाना॑म् । बृ॒ह॒ताम् । अ॒न॒र्वणा॑म् । यथा॑ । वसु॑ । वी॒रऽजा॑तम् । नशा॑महै । तत् । दे॒वाना॑म् । अवः॑ । अ॒द्य । वृ॒णी॒म॒हे॒ ॥

The Pada Paath - transliteration

mahat | adya | mahatām | ā | vṛṇīmahe | avaḥ | devānām | bṛhatām | anarvaṇām | yathā | vasu | vīra-jātam | naśāmahai | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-012

MANTRA NUMBER:

Mantra 12 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 2 of Varga 11 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 84 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- पादनिचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये । श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra without meters (Sanskrit)

महो अग्नेः समिधानस्य शर्मण्यनागा मित्रे वरुणे स्वस्तये । श्रेष्ठे स्याम सवितुः सवीमनि तद्देवानामवो अद्या वृणीमहे ॥

The Mantra's transliteration in English

maho agneḥ samidhānasya śarmaṇy anāgā mitre varuṇe svastaye | śreṣṭhe syāma savituḥ savīmani tad devānām avo adyā vṛṇīmahe ||

The Pada Paath (Sanskrit)

महः । अग्नेः । सम्ऽइधानस्य । शर्मणि । अनागाः । मित्रे । वरुणे । स्वस्तये । श्रेष्ठे । स्याम । सवितुः । सवीमनि । तत् । देवानाम् । अवः । अद्य । वृणीमहे ॥

The Pada Paath - transliteration

mahaḥ | agneḥ | sam-idhānasya | śarmaṇi | anāgāḥ | mitre | varuṇe | svastaye | śreṣṭhe | syāma | savituḥ | savīmani | tat | devānām | avaḥ | adya | vṛṇīmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-013

MANTRA NUMBER:

Mantra 13 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 3 of Varga 11 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 85 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ये स॑वि॒तुः स॒त्यस॑वस्य॒ विश्वे॑ मि॒त्रस्य॑ व्र॒ते वरु॑णस्य दे॒वाः । ते सौभ॑गं वी॒रव॒द्गोम॒दप्नो॒ दधा॑तन॒ द्रवि॑णं चि॒त्रम॒स्मे ॥

The Mantra without meters (Sanskrit)

ये सवितुः सत्यसवस्य विश्वे मित्रस्य व्रते वरुणस्य देवाः । ते सौभगं वीरवद्गोमदप्नो दधातन द्रविणं चित्रमस्मे ॥

The Mantra's transliteration in English

ye savituḥ satyasavasya viśve mitrasya vrate varuṇasya devāḥ | te saubhagaṁ vīravad gomad apno dadhātana draviṇaṁ citram asme ||

The Pada Paath (Sanskrit)

ये । स॒वि॒तुः । स॒त्यऽस॑वस्य । विश्वे॑ । मि॒त्रस्य॑ । व्र॒ते । वरु॑णस्य । दे॒वाः । ते । सौभ॑गम् । वी॒रऽवत् । गोऽम॑त् । अप्नः॑ । दधा॑तन । द्रवि॑णम् । चि॒त्रम् । अ॒स्मे इति॑ ॥

The Pada Paath - transliteration

ye | savituḥ | satya-savasya | viśve | mitrasya | vrate | varuṇasya | devāḥ | te | saubhagam | vīra-vat | go--mat | apnaḥ | dadhātana | draviṇam | citram | asme iti

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-036/mantra-rig-10-036-014

MANTRA NUMBER:

Mantra 14 of Sukta 36 of Mandal 10 of Rig Veda
Mantra 4 of Varga 11 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 86 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- लुशो धानाकः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराट्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒वि॒ता प॒श्चाता॑त्सवि॒ता पु॒रस्ता॑त्सवि॒तोत्त॒रात्ता॑त्सवि॒ताध॒रात्ता॑त् । स॒वि॒ता नः॑ सुवतु स॒र्वता॑तिं सवि॒ता नो॑ रासतां दी॒र्घमायुः॑ ॥

The Mantra without meters (Sanskrit)

सविता पश्चातात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् । सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥

The Mantra's transliteration in English

savitā paśćātāt savitā purastāt savitottarāttāt savitādharāttāt | savitā naḥ suvatu sarvatātiṁ savitā no rāsatāṁ dīrgham āyuḥ ||

The Pada Paath (Sanskrit)

स॒वि॒ता । प॒श्चाता॑त् । स॒वि॒ता । पु॒रस्ता॑त् । स॒वि॒ता । उ॒त्त॒रात्ता॑त् । स॒वि॒ता । अ॒ध॒रात्ता॑त् । स॒वि॒ता । नः॒ । स॒व॒तु॒ । स॒र्वऽता॑तिम् । स॒वि॒ता । नः॒ । रा॒स॒ता॒म् । दी॒र्घम् । आयुः॑ ॥

The Pada Paath - transliteration

savitā | paśćātāt | savitā | purastāt | savitā | uttarāttāt | savitā | adharāttāt | sav itā | naḥ | suvatu | sarva-tātim | savitā | naḥ | rāsatām | dīrgham | āyuḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-001

MANTRA NUMBER:

Mantra 1 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 1 of Varga 12 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 87 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

नमो॑ मि॒त्रस्य॒ वरु॑णस्य॒ चक्ष॑से म॒हो दे॒वाय॒ तदृ॒तं स॑पर्यत । दू॒रे॒दृशे॑ दे॒वजा॑ताय के॒तवे॑ दि॒वस्पु॒त्राय॒ सूर्या॑य शंसत ॥

The Mantra without meters (Sanskrit)

नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतं सपर्यत । दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शंसत ॥

The Mantra's transliteration in English

namo mitrasya varuṇasya cakṣase maho devāya tad ṛtaṁ saparyata | dūredṛśe devajātāya ketave divas putrāya sūryāya śaṁsata ||

The Pada Paath (Sanskrit)

नमः॑ । मि॒त्रस्य॑ । वरु॑णस्य । चक्ष॑से । म॒हः । दे॒वाय॑ । तत् । ऋ॒तम् । स॒प॒र्य॒त॒ । दू॒रे॒ऽदृशे॑ । दे॒वऽजा॑ताय । के॒तवे॑ । दि॒वः । पु॒त्राय॑ । सूर्या॑य । शं॒स॒त॒ ॥

The Pada Paath - transliteration

namaḥ | mitrasya | varuṇasya | cakṣase | mahaḥ | devāya | tat | ṛtam | saparyata | dūre--dṛśe | deva-jātāya | ketave | divaḥ | putrāya | sūryāya | śaṃsata

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-002

MANTRA NUMBER:

Mantra 2 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 2 of Varga 12 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 88 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

सा मा॑ स॒त्योक्ति॒ः परि॑ पातु॒ वि॒श्वतो॒ द्यावा॑ च॒ यत्र॑ त॒तन॒न्नहा॑नि च । विश्व॑म॒न्यन्नि वि॑शत॒े यदेज॑ति वि॒श्वाहापो॑ वि॒श्वाहोदे॑ति॒ सूर्यः॑ ॥

The Mantra without meters (Sanskrit)

सा मा सत्योक्तिः परि पातु विश्वतो द्यावा च यत्र ततनन्नहानि च । विश्वमन्यन्नि विशते यदेजति विश्वाहापो विश्वाहोदेति सूर्यः ॥

The Mantra's transliteration in English

sā mā satyoktiḥ pari pātu viśvato dyāvā ca yatra tatanann ahāni ca | viśvam anyan ni viśate yad ejati viśvāhāpo viśvāhod eti sūryaḥ ||

The Pada Paath (Sanskrit)

सा । मा॒ । स॒त्यऽउ॑क्तिः । परि॑ । पा॒तु॒ । वि॒श्वतः॑ । द्यावा॑ । च॒ । यत्र॑ । त॒तन॑न् । अहा॑नि । च॒ । विश्व॑म् । अ॒न्यत् । नि । वि॒श॒ते॒ । यत् । एज॑ति । वि॒श्वाहा॑ । आपः॑ । वि॒श्वाहा॑ । उत् । ए॒ति॒ । सूर्यः॑ ॥

The Pada Paath - transliteration

sā | mā | satya-uktiḥ | pari | pātu | viśvataḥ | dyāvā | ca | yatra | tatanan | ahān i | ca | viśvam | anyat | ni | viśate | yat | ejati | viśvahā | apaḥ | viśvāhā | ut | et i | sūryaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-003

MANTRA NUMBER:

Mantra 3 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 3 of Varga 12 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 89 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि । प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥

The Mantra without meters (Sanskrit)

न ते अदेवः प्रदिवो नि वासते यदेतशेभिः पतरै रथर्यसि । प्राचीनमन्यदनु वर्तते रज उदन्येन ज्योतिषा यासि सूर्य ॥

The Mantra's transliteration in English

na te adevaḥ pradivo ni vāsate yad etaśebhiḥ patarai ratharyasi | prācīnam anyad anu vartate raja ud anyena jyotiṣā yāsi sūrya ||

The Pada Paath (Sanskrit)

न । ते । अदेवः । प्रऽदिवः । नि । वासते । यत् । एतशेभिः । पतरैः । रथर्यसि । प्राचीनम् । अन्यत् । अनु । वर्तते । रजः । उत् । अन्येन । ज्योतिषा । यासि । सूर्य ॥

The Pada Paath - transliteration

na | te | adevaḥ | pra-divaḥ | ni | vāsate | yat | etaśebhiḥ | pataraiḥ | ratharyasi | prācīnam | anyat | anu | vartate | rajaḥ | ut | anyena | jyotiṣā | yāsi | sūrya

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-004

MANTRA NUMBER:

Mantra 4 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 4 of Varga 12 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 90 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

येन॑ सू॒र्य॒ ज्योति॑षा॒ बाध॑से॒ तमो॒ जग॑च्च॒ विश्व॑मुदि॒यर्षि॑ भा॒नुना॑ । तेना॒स्मद्विश्वा॒मनि॑रा॒मना॑हु॒ति॒मपामी॑वा॒मप॑ दु॒ष्ष्वप्न्यं॑ सुव ॥

The Mantra without meters (Sanskrit)

येन सूर्य ज्योतिषा बाधसे तमो जगच्च विश्वमुदियर्षि भानुना । तेनास्मद्विश्वामनिरामनाहुतिमपामीवामप दुष्ष्वप्न्यं सुव ॥

The Mantra's transliteration in English

yena sūrya jyotiṣā bādhase tamo jagac ca viśvam udiyarṣi bhānunā | tenāsmad viśvām anirām anāhutim apāmīvām apa duṣṣvapnyaṁ suva ||

The Pada Paath (Sanskrit)

येन॑ । सू॒र्य॒ । ज्योति॑षा । बाध॑से । तमः॑ । जग॑त् । च॒ । विश्व॑म् । उ॒त्ऽइ॒यर्षि॑ । भा॒नुना॑ । तेन॑ । अ॒स्मत् । विश्वा॑म् । अनि॑राम् । अना॑हुतिम् । अप॑ । अमी॑वाम् । अप॑ । दुः॒ऽस्वप्न्य॑म् । सु॒व॒ ॥

The Pada Paath - transliteration

yena | sūrya | jyotiṣā | bādhase | tamaḥ | jagat | ca | viśvam | ut-iyarṣi | bhānunā | tena | asmat | viśvām | anirām | anāhutim | apa | amīvām | apa | duḥ-svapnyam | suva

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-005

MANTRA NUMBER:

Mantra 5 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 5 of Varga 12 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 91 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु । यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् ॥

The Mantra without meters (Sanskrit)

विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु । यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् ॥

The Mantra's transliteration in English

viśvasya hi preṣito rakṣasi vratam ahe̱layann uccarasi svadhā anu | yad adya tvā sūryopabravāmahai taṁ no devā anu maṁsīrata kratum ||

The Pada Paath (Sanskrit)

विश्वस्य । हि । प्रऽइषितः । रक्षसि । व्रतम् । अहेळयन् । उत्ऽचरसि । स्वधाः । अनु । यत् । अद्य । त्वा । सूर्य । उपऽब्रवामहै । तत् । नः । देवाः । अनु । मंसीरत । क्रतुम् ॥

The Pada Paath - transliteration

viśvasya | hi | pra-iṣitaḥ | rakṣasi | vratam | aheḷayan | ut-carasi | svadhāḥ | anu | yat | adya | tvā | sūrya | upa-bravāmahai | tat | naḥ | devāḥ | anu | maṃsīrata | kratum

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-006

MANTRA NUMBER:

Mantra 6 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 6 of Varga 12 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 92 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

तं नो॒ द्यावा॑पृथि॒वी तन्न॒ आप॒ इन्द्रः॑ शृण्वन्तु म॒रुतो॒ हवं॒ वचः॑ । मा शूने॑ भूम॒ सूर्य॑स्य सं॒दृशि॑ भ॒द्रं जीव॑न्तो जर॒णाम॑शीमहि ॥

The Mantra without meters (Sanskrit)

तं नो द्यावापृथिवी तन्न आप इन्द्रः शृण्वन्तु मरुतो हवं वचः । मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणामशीमहि ॥

The Mantra's transliteration in English

taṁ no dyāvāpṛthivī tan na āpa indraḥ śṛṇvantu maruto havaṁ vacaḥ | mā śūne bhūma sūryasya saṁdṛśi bhadraṁ jīvanto jaraṇām aśīmahi ||

The Pada Paath (Sanskrit)

तम् । नः॒ । द्यावा॑पृथि॒वी इति॑ । तत् । नः॒ । आपः॑ । इन्द्रः॑ । शृ॒ण्व॒न्तु॒ । म॒रुतः॑ । हव॑म् । वचः॑ । मा । शूने॑ । भू॒म॒ । सूर्य॑स्य । स॒म्ऽदृशि॑ । भ॒द्रम् । जीव॑न्तः । ज॒र॒णाम् । अ॒शी॒म॒हि॒ ॥

The Pada Paath - transliteration

tam | naḥ | dyāvāpṛthivī iti | tat | naḥ | āpaḥ | indraḥ | śṛṇvantu | marutaḥ | havam | vacaḥ | mā | śūne | bhūma | sūryasya | sam-dṛśi | bhadram | jīvantaḥ | jaraṇām | aśīmahi

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-007

MANTRA NUMBER:

Mantra 7 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 1 of Varga 13 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 93 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

वि॒श्वाहा॑ त्वा सु॒मन॑सः सु॒चक्ष॑सः प्र॒जाव॑न्तो अनमी॒वा अना॑गसः । उ॒द्यन्तं॑ त्वा मित्रमहो दि॒वेदि॑वे ज्योग्जी॒वाः प्रति॑ पश्येम सूर्य ॥

The Mantra without meters (Sanskrit)

विश्वाहा त्वा सुमनसः सुचक्षसः प्रजावन्तो अनमीवा अनागसः । उद्यन्तं त्वा मित्रमहो दिवेदिवे ज्योग्जीवाः प्रति पश्येम सूर्य ॥

The Mantra's transliteration in English

viśvāhā tvā sumanasaḥ sucakṣasaḥ prajāvanto anamīvā anāgasaḥ | udyantaṁ tvā mitramaho dive-dive jyog jīvāḥ prati paśyema sūrya ||

The Pada Paath (Sanskrit)

वि॒श्वाहा॑ । त्वा॒ । सु॒ऽमन॑सः । सु॒ऽचक्ष॑सः । प्र॒जाऽव॑न्तः । अ॒न॒मी॒वाः । अना॑गसः । उ॒त्ऽयन्त॑म् । त्वा॒ । मि॒त्र॒ऽम॒हः॒ । दि॒वेऽदि॑वे । ज्योक् । जी॒वाः । प्रति॑ । प॒श्ये॒म॒ । सू॒र्य॒ ॥

The Pada Paath - transliteration

viśvāhā | tvā | su-manasaḥ | su-cakṣasaḥ | prajāvantaḥ | anamīvāḥ | anāgasaḥ | ut-yantam | tvā | mitra-mahaḥ | dive--dive | jyok | jīvāḥ | prati | paśyema | sūrya

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-008

MANTRA NUMBER:

Mantra 8 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 2 of Varga 13 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 94 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषेचक्षुषे मयः । आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥

The Mantra without meters (Sanskrit)

महि ज्योतिर्बिभ्रतं त्वा विचक्षण भास्वन्तं चक्षुषेचक्षुषे मयः । आरोहन्तं बृहतः पाजसस्परि वयं जीवाः प्रति पश्येम सूर्य ॥

The Mantra's transliteration in English

mahi jyotir bibhrataṁ tvā vicakṣaṇa bhāsvantaṁ cakṣuṣe-cakṣuṣe mayaḥ | ārohantam bṛhataḥ pājasas pari vayaṁ jīvāḥ prati paśyema sūrya ||

The Pada Paath (Sanskrit)

महि । ज्योतिः । बिभ्रतम् । त्वा । विऽचक्षण । भास्वन्तम् । चक्षुषेऽचक्षुषे । मयः । आऽरोहन्तम् । बृहतः । पाजसः । परि । वयम् । जीवाः । प्रति । पश्येम । सूर्य ॥

The Pada Paath - transliteration

mahi | jyotiḥ | bibhratam | tvā | vi-cakṣaṇa | bhāsvantam | cakṣuṣe--cakṣuṣe | mayaḥ | ārohantam | bṛhataḥ | pājasaḥ | pari | vayam | jīvāḥ | prati | paśyema | sūrya

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-009

MANTRA NUMBER:

Mantra 9 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 3 of Varga 13 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 95 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

यस्य॑ ते॒ विश्वा॒ भुव॑नानि के॒तुना॒ प्र चेर॑ते॒ नि च॑ वि॒शन्ते॑ अ॒क्तुभिः॑ । अ॒ना॒गा॒स्त्वेन॑ हरिकेश सू॒र्याह्ना॑ह्ना नो॒ वस्य॑सावस्य॒सोदि॑हि ॥

The Mantra without meters (Sanskrit)

यस्य ते विश्वा भुवनानि केतुना प्र चेरते नि च विशन्ते अक्तुभिः । अनागास्त्वेन हरिकेश सूर्याह्नाह्ना नो वस्यसावस्यसोदिहि ॥

The Mantra's transliteration in English

yasya te viśvā bhuvanāni ketunā pra cerate ni ca viśante aktubhiḥ | anāgāstvena harikeśa sūryāhnāhnā no vasyasā-vasyasod ihi ||

The Pada Paath (Sanskrit)

यस्य॑ । ते॒ । विश्वा॑ । भुव॑नानि । के॒तुना॑ । प्र । च॒ । ईर॑ते । नि । च॒ । वि॒शन्ते॑ । अ॒क्तुऽभिः॑ । अ॒ना॒गाः॒ऽत्वेन॑ । ह॒रि॒ऽके॒श॒ । सू॒र्य॒ । अह्ना॑ऽअह्ना । नः॒ । वस्य॑साऽवस्यसा । उत् । इ॒हि॒ ॥

The Pada Paath - transliteration

yasya | te | viśvā | bhuvanāni | ketunā | pra | ca | īrate | ni | ca | viśante | aktu-bhiḥ | anāgāḥ-tvena | hari-keśa | sūrya | ahnā ahnā | naḥ | vasyasāvasyasā | ut | ihi

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-010

MANTRA NUMBER:

Mantra 10 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 4 of Varga 13 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 96 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

शं नौ भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन । यथा शमध्वञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रम् ॥

The Mantra without meters (Sanskrit)

शं नो भव चक्षसा शं नो अह्ना शं भानुना शं हिमा शं घृणेन । यथा शमध्वञ्छमसद्दुरोणे तत्सूर्य द्रविणं धेहि चित्रम् ॥

The Mantra's transliteration in English

śaṁ no bhava cakṣasā śaṁ no ahnā śam bhānunā śaṁ himā śaṁ ghṛṇena | yathā śam adhvañ cham asad duroṇe tat sūrya draviṇaṁ dhehi citram ||

The Pada Paath (Sanskrit)

शम् । नः । भव । चक्षसा । सम् । नः । अह्ना । शम् । भानुना । शम् । हिमाः । शम् । घृणेन । यथा । शम् । अध्वन् । शम् । असत् । दुरोणे । तत् । सूर्य । द्रविणम् । धेहि । चित्रम् ॥

The Pada Paath - transliteration

śam | naḥ | bhava | cakṣasā | sam | naḥ | ahnā | śam | bhānunā | śam | himāḥ | śam | ghṛṇena | yathā | śam | adhvan | śam | asat | duroṇe | tat | sūrya | draviṇam | dhehi | citram

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-011

MANTRA NUMBER:

Mantra 11 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 5 of Varga 13 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 97 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्माकं॑ देवा उ॒भया॑य॒ जन्म॑ने॒ शर्म॑ यच्छत द्वि॒पदे॒ चतु॑ष्पदे । अ॒दत्पिब॑दू॒र्जय॑मान॒माशि॑तं॒ तद॒स्मे शं योर॑र॒पो द॑धातन ॥

The Mantra without meters (Sanskrit)

अस्माकं देवा उभयाय जन्मने शर्म यच्छत द्विपदे चतुष्पदे । अदत्पिबदूर्जयमानमाशितं तदस्मे शं योररपो दधातन ॥

The Mantra's transliteration in English

asmākaṁ devā ubhayāya janmane śarma yacchata dvipade catuṣpade | adat pibad ūrjayamānam āśitaṁ tad asme śaṁ yor arapo dadhātana ||

The Pada Paath (Sanskrit)

अ॒स्माक॑म् । दे॒वाः॒ । उ॒भया॑य । जन्म॑ने । शर्म॑ । य॒च्छ॒त॒ । द्वि॒ऽपदे॑ । चतुः॑ऽपदे । अ॒दत् । पिब॑त् । ऊ॒र्जय॑मानम् । आशि॑तम् । तत् । अ॒स्मे इति॑ । शम् । योः । अ॒र॒पः । द॒धा॒त॒न॒ ॥

The Pada Paath - transliteration

asmākam | devāḥ | ubhayāya | janmane | śarma | yacchata | dvi-pade | catuḥ-pade | adat | pibat | ūrjayamānam | āśitam | tat | asme iti | śam | yoḥ | arapaḥ | dadhātana

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-037/mantra-rig-10-037-012

MANTRA NUMBER:

Mantra 12 of Sukta 37 of Mandal 10 of Rig Veda
Mantra 6 of Varga 13 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 98 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अभितपाः सौर्यः

देवता (Devataa) :- सूर्यः

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

यद्वो॑ देवाश्चकृ॒म जि॒ह्वया॑ गु॒रु मन॑सो वा॒ प्रयु॑ती देव॒हेळ॑नम् । अरा॑वा॒ यो नो॑ अ॒भि दु॑च्छुना॒यते॒ तस्मि॒न्तदेनो॑ वसवो॒ नि धे॑तन ॥

The Mantra without meters (Sanskrit)

यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेळनम् । अरावा यो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो नि धेतन ॥

The Mantra's transliteration in English

yad vo devāś cakṛma jihvayā guru manaso vā prayutī devahel̲anam | arāvā yo no abhi ducchunāyate tasmin tad eno vasavo ni dhetana ||

The Pada Paath (Sanskrit)

यत् । व॒ः । दे॒वा॒ः । च॒कृ॒म । जि॒ह्वया॑ । गु॒रु । मन॑सः । वा॒ । प्रऽयु॑ती । दे॒व॒ऽहेळ॑नम् । अरा॑वा । यः । न॒ः । अ॒भि । दु॒च्छु॒न॒ऽयते॑ । तस्मि॑न् । तत् । एनः॑ । व॒स॒व॒ः । नि । धे॒त॒न ॥

The Pada Paath - transliteration

yat | vaḥ | devāḥ | cakṛma | jihvayā | guru | manasaḥ | vā | pra-yutī | deva-heḷanam | arāvā | yaḥ | naḥ | abhi | ducchuna-yate | tasmin | tat | enaḥ | vasavaḥ | ni | dhetana

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-038/mantra-rig-10-038-001

MANTRA NUMBER:

Mantra 1 of Sukta 38 of Mandal 10 of Rig Veda
Mantra 1 of Varga 14 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 99 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- इन्द्रो मुष्कवान्

देवता (Devataa) :- इन्द्रः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒स्मिन्न॑ इन्द्र पृत्सु॒तौ यश॑स्वति॒ शिमी॑वति॒ क्रन्द॑सि॒ प्राव॑ सा॒तये॑ । यत्र॒ गोषा॑ता धृषि॒तेषु॑ खा॒दिषु॒ विष्व॒क्पत॑न्ति दि॒द्यवो॑ नृ॒षाह्ये॑ ॥

The Mantra without meters (Sanskrit)

अस्मिन्न इन्द्र पृत्सुतौ यशस्वति शिमीवति क्रन्दसि प्राव सातये । यत्र गोषाता धृषितेषु खादिषु विष्वक्पतन्ति दिद्यवो नृषाह्ये ॥

The Mantra's transliteration in English

asmin na indra pṛtsutau yaśasvati śimīvati krandasi prāva sātaye | yatra goṣātā dhṛṣiteṣu khādiṣu viṣvak patanti didyavo nṛṣāhye ||

The Pada Paath (Sanskrit)

अ॒स्मिन् । नः॒ । इ॒न्द्र॒ । पृ॒त्सु॒तौ । यश॑स्वति । शिमी॑ऽवति । क्रन्द॑सि । प्र । अ॒व॒ । सा॒तये॑ । यत्र॑ । गोऽसा॑ता । धृ॒षि॒तेषु॑ । खा॒दिषु॑ । विष्व॑क् । पत॑न्ति । दि॒द्यवः॑ । नृ॒ऽसह्ये॑ ॥

The Pada Paath - transliteration

asmin | naḥ | indra | pṛtsutau | yaśasvati | śimī-vati | krandasi | pra | ava | sātaye | yatra | go--sātā | dhṛṣiteṣu | khādiṣu | viṣvak | patanti | didyavaḥ | nṛ-sahye

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-038/mantra-rig-10-038-002

MANTRA NUMBER:

Mantra 2 of Sukta 38 of Mandal 10 of Rig Veda
Mantra 2 of Varga 14 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 100 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- इन्द्रो मुष्कवान्

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- पादनिचृज्ज्गती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

स नः क्षुमन्तं सदने व्यूर्णुहि गोअर्णसं रयिमिन्द्र श्रवाय्यम् । स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥

The Mantra without meters (Sanskrit)

स नः क्षुमन्तं सदने व्यूर्णुहि गोअर्णसं रयिमिन्द्र श्रवाय्यम् । स्याम ते जयतः शक्र मेदिनो यथा वयमुश्मसि तद्वसो कृधि ॥

The Mantra's transliteration in English

sa naḥ kṣumantaṁ sadane vy ūrṇuhi goarṇasaṁ rayim indra śravāyyam | syāma te jayataḥ śakra medino yathā vayam uśmasi tad vaso kṛdhi ||

The Pada Paath (Sanskrit)

सः । नः । क्षुऽमन्तम् । सदने । वि । ऊर्णुहि । गोऽअर्णसम् । रयिम् । इन्द्र । श्रवाय्यम् । स्याम । ते । जयतः । शक्र । मेदिनः । यथा । वयम् । उश्मसि । तत् । वसो इति । कृधि ॥

The Pada Paath - transliteration

saḥ | naḥ | kṣu-mantam | sadane | vi | ūrṇuhi | go--arṇasam | rayim | indra | śravāyyam | syāma | te | jayataḥ | śakra | medinaḥ | yathā | vayam | uśmasi | tat | vaso iti | kṛdhi

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-038/mantra-rig-10-038-003

MANTRA NUMBER:

Mantra 3 of Sukta 38 of Mandal 10 of Rig Veda
Mantra 3 of Varga 14 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 101 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- इन्द्रो मुष्कवान्

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

यो नो दास आर्यो वा पुरुष्टुतादेव इन्द्र युधये चिकेतति । अस्माभिष्टे सुषहाः सन्तु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥

The Mantra without meters (Sanskrit)

यो नो दास आर्यो वा पुरुष्टुतादेव इन्द्र युधये चिकेतति । अस्माभिष्टे सुषहाः सन्तु शत्रवस्त्वया वयं तान्वनुयाम संगमे ॥

The Mantra's transliteration in English

yo no dāsa āryo vā puruṣṭutādeva indra yudhaye ciketati | asmābhiṣ ṭe suṣahāḥ santu śatravas tvayā vayaṁ tān vanuyāma saṁgame ||

The Pada Paath (Sanskrit)

यः । नः । दासः । आर्यः । वा । पुरुऽस्तुत । अदेवः । इन्द्र । युधये । चिकेतति । अस्माभिः । ते । सुऽसहाः । सन्तु । शत्रवः । त्वया । वयम् । तान् । वनुयाम । समऽगमे ॥

The Pada Paath - transliteration

yaḥ | naḥ | dāsaḥ | āryaḥ | vā | puru-stuta | adevaḥ | indra | yudhaye | ciketati | asmābhiḥ | te | su-sahāḥ | santu | śatravaḥ | tvayā | vayam | tān | vanuyāma | sam-game

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-038/mantra-rig-10-038-004

MANTRA NUMBER:

Mantra 4 of Sukta 38 of Mandal 10 of Rig Veda
Mantra 4 of Varga 14 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 102 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- इन्द्रो मुष्कवान्

देवता (Devataa) :- इन्द्र:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

यो द॒भ्रेभि॑र्ह॒व्यो॒ यश्च॒ भूरि॑भि॒र्यो अ॒भीके॑ वरिवो॒विन्नृ॒षाह्ये॑ । तं वि॑खा॒दे सस्नि॑म॒द्य श्रु॒तं नर॑म॒र्वाञ्च॒मिन्द्र॒मव॑से करामहे ॥

The Mantra without meters (Sanskrit)

यो दभ्रेभिर्हव्यो यश्च भूरिभिर्यो अभीके वरिवोविन्नृषाह्ये । तं विखादे सस्निमद्य श्रुतं नरमर्वाञ्चमिन्द्रमवसे करामहे ॥

The Mantra's transliteration in English

yo dabhrebhir havyo yaś ca bhūribhir yo abhīke varivovin nṛṣāhye | taṁ vikhāde sasnim adya śrutaṁ naram arvāñcam indram avase karāmahe ||

The Pada Paath (Sanskrit)

यः । द॒भ्रेभिः॑ । ह॒व्यः॑ । यः । च॒ । भूरि॑ऽभिः । यः । अ॒भीके॑ । व॒रि॒वः॒ऽवित् । नृ॒ऽसह्ये॑ । तम् । वि॒ऽखा॒दे । सस्नि॑म् । अ॒द्य । श्रु॒तम् । नर॑म् । अ॒र्वाञ्च॑म् । इन्द्र॑म् । अव॑से । क॒रा॒म॒हे॒ ॥

The Pada Paath - transliteration

yaḥ | dabhrebhiḥ | havyaḥ | yaḥ | ca | bhūri-bhiḥ | yaḥ | abhīke | varivaḥ-vit | nṛ-sahye | tam | vi-khāde | sasnim | adya | śrutam | naram | arvāñcam | indram | avase | karāmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-038/mantra-rig-10-038-005

MANTRA NUMBER:

Mantra 5 of Sukta 38 of Mandal 10 of Rig Veda
Mantra 5 of Varga 14 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 103 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- इन्द्रो मुष्कवान्

देवता (Devataa) :- इन्द्रः

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

स्व॒वृजं॒ हि त्वाम॒हमि॑न्द्र शु॒श्रवा॑नानु॒दं वृ॑षभ रध्र॒चोद॑नम् । प्र मुं॑ञ्चस्व॒ परि॒ कुत्सा॑दि॒हा ग॑हि॒ किमु॒ त्वावा॑न्मु॒ष्कयो॑र्ब॒द्ध आ॑सते ॥

The Mantra without meters (Sanskrit)

स्ववृजं हि त्वामहमिन्द्र शुश्रवानानुदं वृषभ रध्रचोदनम् । प्र मुञ्चस्व परि कुत्सादिहा गहि किमु त्वावान्मुष्कयोर्बद्ध आसते ॥

The Mantra's transliteration in English

svavṛjaṁ hi tvām aham indra śuśravānānudaṁ vṛṣabha radhracodanam | pra muñcasva pari kutsād ihā gahi kim u tvāvān muṣkayor baddha āsate ||

The Pada Paath (Sanskrit)

स्व॒ऽवृज॑म् । हि । त्वाम् । अ॒हम् । इ॒न्द्र॒ । शु॒श्रव॑ । अ॒न॒नु॒ऽदम् । वृ॒ष॒भ॒ । र॒ध्र॒ऽचोद॑नम् । प्र । मु॒ञ्च॒स्व॒ । परि॑ । कु॒त्सा॑त् । इ॒ह । आ । ग॒हि॒ । किम् । ऊँ॒ इति॑ । त्वाऽवा॑न् । मु॒ष्कयोः॑ । ब॒द्धः । आ॒स॒ते॒ ॥

The Pada Paath - transliteration

sva-vṛjam | hi | tvām | aham | indra | śuśrava | ananu-dam | vṛṣabha | radhra-codanam | pra | muñcasva | pari | kutsāt | iha | ā | gahi | kim | oṃ iti | tvāvān | muṣkayoḥ | baddhaḥ | āsate

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-039/mantra-rig-10-039-001

MANTRA NUMBER:
Mantra 1 of Sukta 39 of Mandal 10 of Rig Veda
Mantra 1 of Varga 15 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 104 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- घोषा काक्षीवती

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता । शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥

The Mantra without meters (Sanskrit)

यो वां परिज्मा सुवृदश्विना रथो दोषामुषासो हव्यो हविष्मता । शश्वत्तमासस्तमु वामिदं वयं पितुर्न नाम सुहवं हवामहे ॥

The Mantra's transliteration in English

yo vām parijmā suvṛd aśvinā ratho doṣām uṣāso havyo haviṣmatā | śaśvattamāsas tam u vām idaṁ vayam pitur na nāma suhavaṁ havāmahe ||

The Pada Paath (Sanskrit)

यः । वाम् । परिऽज्मा । सुऽवृत् । अश्विना । रथः । दोषाम् । उषसः । हव्यः । हविष्मता । शश्वत्ऽतमासः । तम् । ऊँ इति । वाम् । इदम् । वयम् । पितुः । न । नाम । सुऽहवम् । हवामहे ॥

The Pada Paath - transliteration

yaḥ | vām | pari-jmā | su-vṛt | aśvinā | rathaḥ | doṣām | uṣasaḥ | havyaḥ | hav iṣmatā | śaśvat-tamāsaḥ | tam | oṃ iti | vām | idam | vayam | pituḥ | na | nāma | su-havam | havāmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-039/mantra-rig-10-039-002

MANTRA NUMBER:

Mantra 2 of Sukta 39 of Mandal 10 of Rig Veda
Mantra 2 of Varga 15 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 105 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- घोषा काक्षीवती

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

चो॒दय॑तं सू॒नृता॒: पिन्व॑तं॒ धिय॒ उत्पुरं॑धीरीरयतं॒ तद्उ॑श्मसि । य॒शसं॑ भा॒गं कृ॑णुतं नो अश्विना॒ सोमं॒ न चारुं॑ म॒घव॑त्सु नस्कृतम् ॥

The Mantra without meters (Sanskrit)

चोदयतं सूनृताः पिन्वतं धिय उत्पुरंधीरीरयतं तदुश्मसि । यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम् ॥

The Mantra's transliteration in English

codayataṁ sūnṛtāḥ pinvataṁ dhiya ut puraṁdhīr īrayataṁ tad uśmasi | yaśasam bhāgaṁ kṛṇutaṁ no aśvinā somaṁ na cārum maghavatsu nas kṛtam ||

The Pada Paath (Sanskrit)

चो॒दय॑तम् । सू॒नृताः॑ । पिन्व॑तम् । धियः॑ । उत् । पुर॑म्ऽधीः । ई॒र॒य॒त॒म् । तत् । उ॒श्म॒सि॒ । य॒शस॑म् । भा॒गम् । कृ॒णु॒त॒म् । नः॒ । अ॒श्वि॒ना॒ । सोम॑म् । न । चारु॑म् । म॒घव॑त्ऽसु । नः॒ । कृ॒त॒म् ॥

The Pada Paath - transliteration

codayatam | sūnṛtāḥ | pinvatam | dhiyaḥ | ut | puram-dhīḥ | īrayatam | tat | uśmasi | yaśasam | bhāgam | kṛṇutam | naḥ | aśvinā | somam | na | cārum | maghavat-su | naḥ | kṛtam

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-039/mantra-rig-10-039-003

MANTRA NUMBER:

Mantra 3 of Sukta 39 of Mandal 10 of Rig Veda
Mantra 3 of Varga 15 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 106 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- घोषा काक्षीवती

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒मा॒जुर॑श्चिद्भवथो यु॒वं भगो॑ऽना॒शोश्चि॑दवि॒तारा॑प॒मस्य॑ चित् । अ॒न्धस्य॑ चिन्नासत्या कृ॒शस्य॑ चिद्यु॒वामिदा॑हुर्भि॒षजा॑ रु॒तस्य॑ चित् ॥

The Mantra without meters (Sanskrit)

अमाजुरश्चिद्भवथो युवं भगोऽनाशोश्चिदवितारापमस्य चित् । अन्धस्य चिन्नासत्या कृशस्य चिद्युवामिदाहुर्भिषजा रुतस्य चित् ॥

The Mantra's transliteration in English

amājuraś cid bhavatho yuvam bhago 'nāśoś cid avitārāpamasya cit | andhasya cin nāsatyā kṛśasya cid yuvām id āhur bhiṣajā rutasya cit ||

The Pada Paath (Sanskrit)

अ॒मा॒ऽजुरः॑ । चि॒त् । भ॒व॒थ॒ः । यु॒वम् । भगः॑ । अ॒ना॒शोः । चि॒त् । अ॒वि॒तारा॑ । अ॒प॒मस्य॑ । चि॒त् । अ॒न्धस्य॑ । चि॒त् । ना॒स॒त्या॒ । कृ॒शस्य॑ । चि॒त् । यु॒वाम् । इत् । आ॒हु॒ः । भि॒षजा॑ । रु॒तस्य॑ । चि॒त् ॥

The Pada Paath - transliteration

amājuraḥ | cit | bhavathaḥ | yuvam | bhagaḥ | anāśoḥ | cit | avitārā | apamasya | ci t | andhasya | cit | nāsatyā | kṛśasya | cit | yuvām | it | āhuḥ | bhiṣajā | rutasya | ci t

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-039/mantra-rig-10-039-004

MANTRA NUMBER:

Mantra 4 of Sukta 39 of Mandal 10 of Rig Veda
Mantra 4 of Varga 15 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 107 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- घोषा काक्षीवती

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- पादनिचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः । निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥

The Mantra without meters (Sanskrit)

युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः । निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ॥

The Mantra's transliteration in English

yuvaṁ cyavānaṁ sanayaṁ yathā ratham punar yuvānaṁ carathāya takṣathuḥ | niṣ ṭaugryam ūhathur adbhyas pari viśvet tā vāṁ savaneṣu pravācyā ||

The Pada Paath (Sanskrit)

युवम् । च्यवानम् । सनयम् । यथा । रथम् । पुनः । युवानम् । चरथाय । तक्षथुः । निः । तौग्र्यम् । ऊहथुः । अत्ऽभ्यः । परि । विश्वा । इत् । ता । वाम् । सवनेषु । प्रऽवाच्या ॥

The Pada Paath - transliteration

yuvam | cyavānam | sanayam | yathā | ratham | punaḥ | yuvānam | carathāya | takṣathuḥ | niḥ | taugryam | ūhathuḥ | at-bhyaḥ | pari | viśvā | it | tā | vām | savaneṣu | pra-vācyā

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-039/mantra-rig-10-039-005

MANTRA NUMBER:

Mantra 5 of Sukta 39 of Mandal 10 of Rig Veda
Mantra 5 of Varga 15 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 108 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- घोषा काक्षीवती

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- पादनिचृज्ज्गती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

पुराणा वां वीर्या३ प्र ब्रवा जनेऽथौ हासथुर्भिषजा मयोभुवा । ता वां नु नव्यावसे करामहेऽयं नासत्या श्रदरिर्यथा दधत् ॥

The Mantra without meters (Sanskrit)

पुराणा वां वीर्या प्र ब्रवा जनेऽथो हासथुर्भिषजा मयोभुवा । ता वां नु नव्याववसे करामहेऽयं नासत्या श्रदरिर्यथा दधत् ॥

The Mantra's transliteration in English

purāṇā vāṁ vīryā pra bravā jane 'tho hāsathur bhiṣajā mayobhuvā | tā vāṁ nu navyāv avase karāmahe 'yaṁ nāsatyā śrad arir yathā dadhat ||

The Pada Paath (Sanskrit)

पुराणा । वाम् । वीर्या । प्र । ब्रव । जने । अथो इति । ह । आसथुः । भिषजा । मयःऽभुवा । ता । वाम् । नु । नव्यौ । अवसे । करामहे । अयम् । नासत्या । श्रत् । अरिः । यथा । दधत् ॥

The Pada Paath - transliteration

purāṇā | vām | vīryā | pra | brava | jane | atho iti | ha | āsathuḥ | bhiṣajā | mayaḥ-bhuvā | tā | vām | nu | navyau | avase | karāmahe | ayam | nāsatyā | śrat | ariḥ | yathā | dadhat

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-039/mantra-rig-10-039-006

MANTRA NUMBER:

Mantra 6 of Sukta 39 of Mandal 10 of Rig Veda
Mantra 1 of Varga 16 of Adhyaya 8 of Ashtak 7 of Rig Veda
Mantra 109 of Anuvaak 3 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- घोषा काक्षीवती

देवता (Devataa) :- अश्विनौ

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् । ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ॥

The Mantra without meters (Sanskrit)

तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम् । ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः ॥

The Mantra's transliteration in English

teṣāṁ hi mahnā mahatām anarvaṇāṁ stomām̐ iyarmy ṛtajñā ṛtāvṛdhām | ye apsavam arṇavaṁ citrarādhasas te no rāsantām mahaye sumitryāḥ ||

The Pada Paath (Sanskrit)

तेषाम् । हि । मह्ना । महताम् । अनर्वणाम् । स्तोमान् । इयर्मि । ऋतऽज्ञाः । ऋतऽवृधाम् । ये । अप्सवम् । अर्णवम् । चित्रऽराधसः । ते । नः । रासन्ताम् । महये । सुऽमित्र्याः ॥

The Pada Paath - transliteration

teṣām | hi | mahnā | māhatām | anarvaṇām | stomān | iyarmi | ṛta-jñāḥ | ṛta-vṛdhām | ye | apsavam | arṇavam | citra-rādhasaḥ | te | naḥ | rāsantām | mahaye | su-mitryāḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-004

MANTRA NUMBER:

Mantra 4 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 4 of Varga 9 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 76 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

स्व॑र्णरम॒न्तरि॑क्षाणि रोच॒ना द्या॒वा॒भूमी॑ पृथि॒वीं स्क॑म्भु॒रोज॑सा । पृ॒क्षा इ॑व म॒हय॑न्तः सु॒रा॒तयो॑ दे॒वाः स्त॑वन्ते॒ मनु॑षाय सू॒रय॑: ॥

The Mantra without meters (Sanskrit)

स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कम्भुरोजसा । पृक्षा इव महयन्तः सुरातयो देवाः स्तवन्ते मनुषाय सूरयः ॥

The Mantra's transliteration in English

svarṇaram antarikṣāṇi rocanā dyāvābhūmī pṛthivīṁ skambhur ojasā | pṛkṣā iva mahayantaḥ surātayo devāḥ stavante manuṣāya sūrayaḥ ||

The Pada Paath (Sanskrit)

स्व॑ःऽनरम् । अ॒न्तरि॑क्षाणि । रो॒च॒ना । द्या॒वा॒भू॒मी॒ इति॑ । पृ॒थि॒वीम् । स्क॒म्भु॒: । ओज॑सा । पृ॒क्षाःऽइ॑व । म॒हय॑न्तः । सु॒ऽरा॒तय॑: । दे॒वाः । स्त॒व॒न्ते॒ । मनु॑षाय । सू॒रय॑: ॥

The Pada Paath - transliteration

svaḥ-naram | antarikṣāṇi | rocanā | dyāvābhūmī iti | pṛthivīm | skambhuḥ | ojasā | pṛkṣāḥ-iva | mahayantaḥ | su-rātayaḥ | devāḥ | stavante | manuṣāya | sūrayaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-005

MANTRA NUMBER:

Mantra 5 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 5 of Varga 9 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 77 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

मि॒त्राय॑ शिक्ष॒ वरु॑णाय दा॒शुषे॒ या स॒म्राजा॒ मन॑सा॒ न प्र॒युच्छ॑तः । ययो॒र्धाम॒ धर्म॑णा॒ रोच॑ते बृ॒हद्ययो॑रु॒भे रोद॑सी॒ नाध॑सी॒ वृतौ॑ ॥

The Mantra without meters (Sanskrit)

मित्राय शिक्ष वरुणाय दाशुषे या सम्राजा मनसा न प्रयुच्छतः । ययोर्धाम धर्मणा रोचते बृहद्ययोरुभे रोदसी नाधसी वृतौ ॥

The Mantra's transliteration in English

mitrāya śikṣa varuṇāya dāśuṣe yā samrājā manasā na prayucchataḥ | yayor dhāma dharmaṇā rocate bṛhad yayor ubhe rodasī nādhasī vṛtau ||

The Pada Paath (Sanskrit)

मि॒त्राय॑ । शि॒क्ष॒ । वरु॑णाय । दा॒शुषे॑ । या । स॒म्ऽराजा॑ । मन॑सा । न । प्र॒ऽयुच्छ॑तः । ययोः॑ । धाम॑ । धर्म॑णा । रोच॑ते । बृ॒हत् । ययोः॑ । उ॒भे इति॑ । रोद॑सी॒ इति॑ । नाध॑सी॒ इति॑ । वृतौ॑ ॥

The Pada Paath - transliteration

mitrāya | śikṣa | varuṇāya | dāśuṣe | yā | sam-rājā | manasā | na | pra-yucchataḥ | yayoḥ | dhāma | dharmaṇā | rocate | bṛhat | yayoḥ | ubhe iti | rodasī | iti | nādhasī iti | vṛtau

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-006

MANTRA NUMBER:

Mantra 6 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 1 of Varga 10 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 78 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः । सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥

The Mantra without meters (Sanskrit)

या गौर्वर्तनिं पर्येति निष्कृतं पयो दुहाना व्रतनीरवारतः । सा प्रब्रुवाणा वरुणाय दाशुषे देवेभ्यो दाशद्धविषा विवस्वते ॥

The Mantra's transliteration in English

yā gaur vartanim paryeti niṣkṛtam payo duhānā vratanīr avārataḥ | sā prabruvāṇā varuṇāya dāśuṣe devebhyo dāśad dhaviṣā vivasvate ||

The Pada Paath (Sanskrit)

या । गौः । वर्तनिम् । परिऽएति । निःऽकृतम् । पयः । दुहाना । व्रतऽनीः । अवारतः । सा । प्रऽब्रुवाणा । वरुणाय । दाशुषे । देवेभ्यः । दाशत् । हविषा । विवस्वते ॥

The Pada Paath - transliteration

yā | gauḥ | vartanim | pari-eti | niḥ-kṛtam | payaḥ | duhānā | vrata-nīḥ | avārataḥ | sā | pra-bruvāṇā | varuṇāya | dāśuṣe | devebhyaḥ | dāśat | haviṣā | vivasvate

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-007

MANTRA NUMBER:

Mantra 7 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 2 of Varga 10 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 79 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

दि॒वक्ष॑सो अ॒ग्निजि॑ह्वा ऋ॒ता॒वृध॑ ऋ॒तस्य॒ योनिं॑ वि॒मृ॒शन्त॑ आसते । द्यां स्क॑भि॒त्व्य१॒॑प आ च॑क्रु॒रोज॑सा य॒ज्ञं ज॑नि॒त्वी त॒न्वी३॒॑ नि मा॑मृजुः ॥

The Mantra without meters (Sanskrit)

दिवक्षसो अग्निजिह्वा ऋतावृध ऋतस्य योनिं विमृशन्त आसते । द्यां स्कभित्व्यप आ चक्रुरोजसा यज्ञं जनित्वी तन्वी नि मामृजुः ॥

The Mantra's transliteration in English

divakṣaso agnijihvā ṛtāvṛdha ṛtasya yoniṁ vimṛśanta āsate | dyāṁ skabhitvy apa ā cakrur ojasā yajñaṁ janitvī tanvī ni māmṛjuḥ ||

The Pada Paath (Sanskrit)

दि॒वक्ष॑सः । अ॒ग्नि॒ऽजि॒ह्वाः । ऋ॒त॒ऽवृधः॑ । ऋ॒तस्य॑ । योनि॑म् । वि॒ऽमृ॒शन्तः॑ । आ॒स॒ते॒ । द्याम् । स्क॒भि॒त्वी । अ॒पः । आ । च॒क्रुः॒ । ओज॑सा । य॒ज्ञम् । ज॒नि॒त्वी । त॒न्वि॑ । नि । म॒मृ॒जुः ॥

The Pada Paath - transliteration

divakṣasaḥ | agni-jihvāḥ | ṛta-vṛdhaḥ | ṛtasya | yonim | vi-mṛśantaḥ | āsate | dyām | skabhitvī | apaḥ | ā | cakruḥ | ojasā | yajñam | janitvī | tanvi | ni | mamṛjuḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-008

MANTRA NUMBER:

Mantra 8 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 3 of Varga 10 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 80 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

परि॒क्षिता॑ पि॒तरा॑ पू॒र्व॒जाव॑री ऋ॒तस्य॒ योना॑ क्षयत॒: समो॑कसा । द्या॒वा॑पृथि॒वी वरु॑णाय॒ सव्र॑ते घृ॒तव॒त्पयो॑ महि॒षाय॑ पिन्वतः ॥

The Mantra without meters (Sanskrit)

परिक्षिता पितरा पूर्वजावरी ऋतस्य योना क्षयतः समोकसा । द्यावापृथिवी वरुणाय सव्रते घृतवत्पयो महिषाय पिन्वतः ॥

The Mantra's transliteration in English

parikṣitā pitarā pūrvajāvarī ṛtasya yonā kṣayataḥ samokasā | dyāvāpṛthivī varuṇāya savrate ghṛtavat payo mahiṣāya pinvataḥ ||

The Pada Paath (Sanskrit)

प॒रि॒ऽक्षिता॑ । पि॒तरा॑ । पू॒र्व॒जाव॑री॒ इति॑ पू॒र्व॒ऽजाव॑री । ऋ॒तस्य॑ । योना॑ । क्ष॒य॒त॒: । सम्ऽओ॑कसा । द्यावा॑पृथि॒वी इति॑ । वरु॑णाय । सव्र॑ते॒ इति॒ सऽव्र॑ते । घृ॒तऽव॑त् । पयः॑ । म॒हि॒षाय॑ । पि॒न्व॒त॒: ॥

The Pada Paath - transliteration

pari-kṣitā | pitarā | pūrvajāvarī itipūrva-jāvarī | ṛtasya | yonā | kṣayataḥ | sam-okasā | dyāvāpṛthivī iti | varuṇāya | savrateitisa-vrate | ghṛta-vat | payaḥ | mahiṣāya | pinvataḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-009

MANTRA NUMBER:

Mantra 9 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 4 of Varga 10 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 81 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

प॒र्जन्या॒वाता॑ वृ॒ष॒भा पु॑री॒षिणे॑न्द्रवा॒यू॒ वरु॑णो मि॒त्रो अ॑र्य॒मा । दे॒वाँ आ॑दि॒त्याँ अदि॑तिं हवामहे॒ ये पार्थि॑वासो दि॒व्यासो॑ अ॒प्सु ये ॥

The Mantra without meters (Sanskrit)

पर्जन्यावाता वृषभा पुरीषिणेन्द्रवायू वरुणो मित्रो अर्यमा । देवाँ आदित्याँ अदितिं हवामहे ये पार्थिवासो दिव्यासो अप्सु ये ॥

The Mantra's transliteration in English

parjanyāvātā vṛṣabhā purīṣiṇendravāyū varuṇo mitro aryamā | devām̐ ādityām̐ aditiṁ havāmahe ye pārthivāso divyāso apsu ye ||

The Pada Paath (Sanskrit)

प॒र्जन्या॒वाता॑ । वृ॒ष॒भा । पु॒री॒षिणा॑ । इ॒न्द्र॒वा॒यू इति॑ । वरु॑णः । मि॒त्रः । अ॒र्य॒मा । दे॒वान् । आ॒दि॒त्यान् । अदि॑तिम् । ह॒वा॒म॒हे॒ । ये । पार्थि॑वासः । दि॒व्यासः॑ । अ॒प्ऽसु । ये ॥

The Pada Paath - transliteration

parjanyāvātā | vṛṣabhā | purīṣiṇā | indravāyū iti | varuṇaḥ | mitraḥ | aryamā | devān | ādityān | aditim | havāmahe | ye | pārthivāsaḥ | divyāsaḥ | ap-su | ye

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-010

MANTRA NUMBER:

Mantra 10 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 5 of Varga 10 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 82 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

त्वष्टा॑रं वा॒युमृ॒भवो॒ य ओह॑ते॒ दैव्या॒ होता॑रा उ॒षसं॑ स्व॒स्तये॑ । बृह॒स्पतिं॑ वृत्रखा॒दं सु॒मे॒धस॑मिन्द्रि॒यं सोमं॑ धन॒सा उ॑ ईमहे ॥

The Mantra without meters (Sanskrit)

त्वष्टारं वायुमृभवो य ओहते दैव्या होतारा उषसं स्वस्तये । बृहस्पतिं वृत्रखादं सुमेधसमिन्द्रियं सोमं धनसा उ ईमहे ॥

The Mantra's transliteration in English

tvaṣṭāraṁ vāyum ṛbhavo ya ohate daivyā hotārā uṣasaṁ svastaye | bṛhaspatiṁ vṛtrakhādaṁ sumedhasam indriyaṁ somaṁ dhanasā u īmahe ||

The Pada Paath (Sanskrit)

त्वष्टा॑रम् । वा॒युम् । ऋ॒भ॒वः॒ । यः । ओह॑ते । दैव्या॑ । होता॑रौ । उ॒षस॑म् । स्व॒स्तये॑ । बृह॒स्पति॑म् । वृ॒त्र॒ऽखा॒दम् । सु॒ऽमे॒धस॑म् । इ॒न्द्रि॒यम् । सोम॑म् । ध॒न॒ऽसाः । उँ इति॑ । ई॒म॒हे॒ ॥

The Pada Paath - transliteration

tvaṣṭāram | vāyum | ṛbhavaḥ | yaḥ | ohate | daivyā | hotārau | uṣasam | svastaye | bṛhaspatim | vṛtra-khādam | su-medhasam | indriyam | somam | dhana-sāḥ | oṃ iti | īmahe

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-011

MANTRA NUMBER:

Mantra 11 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 1 of Varga 11 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 83 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः । सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥

The Mantra without meters (Sanskrit)

ब्रह्म गामश्वं जनयन्त ओषधीर्वनस्पतीन्पृथिवीं पर्वताँ अपः । सूर्यं दिवि रोहयन्तः सुदानव आर्या व्रता विसृजन्तो अधि क्षमि ॥

The Mantra's transliteration in English

brahma gām aśvaṁ janayanta oṣadhīr vanaspatīn pṛthivīm parvatām̐ apaḥ | sūryaṁ divi rohayantaḥ sudānava āryā vratā visṛjanto adhi kṣami ||

The Pada Paath (Sanskrit)

ब्रह्म । गाम् । अश्वम् । जनयन्तः । ओषधीः । वनस्पतीन् । पृथिवीम् । पर्वतान् । अपः । सूर्य । दिवि । रोहयन्तः । सुऽदानवः । आर्या । व्रता । विऽसृजन्तः । अधि । क्षमि ॥

The Pada Paath - transliteration

brahma | gām | aśvam | janayantaḥ | oṣadhīḥ | vanaspatīn | pṛthivīm | parvatān | apaḥ | sūrya | divi | rohayantaḥ | su-dānavaḥ | āryā | vratā | vi-sṛjantaḥ | adhi | kṣami

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-012

MANTRA NUMBER:

Mantra 12 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 2 of Varga 11 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 84 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम् । कमद्युवं विमदायोहथुर्युवं विष्णाप्वं१ विश्वकायाव सृजथः ॥

The Mantra without meters (Sanskrit)

भुज्युमंहसः पिपृथो निरश्विना श्यावं पुत्रं वध्रिमत्या अजिन्वतम् । कमद्युवं विमदायोहथुर्युवं विष्णाप्वं विश्वकायाव सृजथः ॥

The Mantra's transliteration in English

bhujyum aṁhasaḥ pipṛtho nir aśvinā śyāvam putraṁ vadhrimatyā ajinvatam | kamadyuvaṁ vimadāyohathur yuvaṁ viṣṇāpvaṁ viśvakāyāva sṛjathaḥ ||

The Pada Paath (Sanskrit)

भुज्युम् । अंहसः । पिपृथः । निः । अश्विना । श्यावम् । पुत्रम् । वध्रिऽमत्याः । अजिन्वतम् । कमऽद्युवम् । विऽमदाय । ऊहथुः । युवम् । विष्णाप्वम् । विश्वकाय । अव । सृजथः ॥

The Pada Paath - transliteration

bhujyum | aṃhasaḥ | pipṛthaḥ | niḥ | aśvinā | śyāvam | putram | vadhri-matyāḥ | ajinvatam | kama-dyuvam | vi-madāya | ūhathuḥ | yuvam | viṣṇāpvam | viśvakāya | ava | sṛjathaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-013

MANTRA NUMBER:

Mantra 13 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 3 of Varga 11 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 85 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः । विश्वे देवासः शृणवन्वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥

The Mantra without meters (Sanskrit)

पावीरवी तन्यतुरेकपादजो दिवो धर्ता सिन्धुरापः समुद्रियः । विश्वे देवासः शृणवन्वचांसि मे सरस्वती सह धीभिः पुरंध्या ॥

The Mantra's transliteration in English

pāvīravī tanyatur ekapād ajo divo dhartā sindhur āpaḥ samudriyaḥ | viśve devāsaḥ śṛṇavan vacāṁsi me sarasvatī saha dhībhiḥ puraṁdhyā ||

The Pada Paath (Sanskrit)

पावीरवी । तन्यतुः । एकऽपात् । अजः । दिवः । धर्ता । सिन्धुः । आपः । समुद्रियः । विश्वे । देवासः । शृणवन् । वचांसि । मे । सरस्वती । सह । धीभिः । पुरम्ऽध्या ॥

The Pada Paath - transliteration

pāvīravī | tanyatuḥ | eka-pāt | ajaḥ | divaḥ | dhartā | sindhuḥ | āpaḥ | samudriyaḥ | viśve | devāsaḥ | śṛṇavan | vacāṃsi | me | sarasvatī | saha | dhībhiḥ | puram-dhyā

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-014

MANTRA NUMBER:

Mantra 14 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 4 of Varga 11 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 86 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

विश्वे देवाः सह धीभिः पुरंध्या मनोर्यजंत्रा अमृतां ऋतज्ञाः । रातिषाचौ अभिषाचः स्वर्विदः स्व१ र्गिरो ब्रह्म सूक्तं जुषेरत ॥

The Mantra without meters (Sanskrit)

विश्वे देवाः सह धीभिः पुरंध्या मनोर्यजत्रा अमृता ऋतज्ञाः । रातिषाचो अभिषाचः स्वर्विदः स्वर्गिरो ब्रह्म सूक्तं जुषेरत ॥

The Mantra's transliteration in English

viśve devāḥ saha dhībhiḥ puraṁdhyā manor yajatrā amṛtā ṛtajñāḥ | rātiṣāco abhiṣācaḥ svarvidaḥ svar giro brahma sūktaṁ juṣerata ||

The Pada Paath (Sanskrit)

विश्वे । देवाः । सह । धीभिः । पुरम्ऽध्या । मनोः । यजत्राः । अमृताः । ऋतऽज्ञाः । रातिऽसाचः । अभिऽसाचः । स्वःऽविदः स्वः । गिरः । ब्रह्म । सुऽउक्तम् । जुषेरत ॥

The Pada Paath - transliteration

viśve | devāḥ | saha | dhībhiḥ | puram-dhyā | manoḥ | yajatrāḥ | amṛtāḥ | ṛta-jñāḥ | rāti-sācaḥ | abhi-sācaḥ | svaḥ-vidaḥ svaḥ | giraḥ | brahma | su-uktam | juṣerata

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-065/mantra-rig-10-065-015

MANTRA NUMBER:

Mantra 15 of Sukta 65 of Mandal 10 of Rig Veda
Mantra 5 of Varga 11 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 87 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

दे॒वान्वसि॑ष्ठो अ॒मृता॑न्ववन्दे॒ ये विश्वा॒ भुव॑ना॒भि प्र॑त॒स्थुः । ते नौ रासन्तामुरुगा॒यम॒द्य यू॒यं पा॑त स्व॒स्तिभि॒: सदा॑ नः ॥

The Mantra without meters (Sanskrit)

देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः । ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥

The Mantra's transliteration in English

devān vasiṣṭho amṛtān vavande ye viśvā bhuvanābhi pratasthuḥ | te no rāsantām urugāyam adya yūyam pāta svastibhiḥ sadā naḥ ||

The Pada Paath (Sanskrit)

दे॒वान् । वसि॑ष्ठः । अ॒मृता॑न् । व॒व॒न्दे॒ । ये । विश्वा॑ । भुव॑ना । अ॒भि । प्र॒ऽत॒स्थुः । ते । न॒ः । रा॒स॒न्ता॒म् । उ॒रु॒ऽगा॒यम् । अ॒द्य । यू॒यम् । पा॒त॒ । स्व॒स्तिऽभि॑ः । सदा॑ । न॒ः ॥

The Pada Paath - transliteration

devān | vasiṣṭhaḥ | amṛtān | vavande | ye | viśvā | bhuvanā | abhi | pra-tasthuḥ | te | naḥ | rāsantām | uru-gāyam | adya | yūyam | pāta | svasti-bhiḥ | sadā | naḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-001

MANTRA NUMBER:

Mantra 1 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 1 of Varga 12 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 88 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

दे॒वान्हु॑वे बृ॒हच्छ्र॑वसः स्व॒स्तये॑ ज्योति॒ष्कृतो॑ अध्व॒रस्य॒ प्रचे॑तसः । ये वा॑वृ॒धुः प्र॑त॒रं वि॒श्ववे॑दस॒ इन्द्र॑ज्येष्ठासो अ॒मृता॑ ऋता॒वृधः॑ ॥

The Mantra without meters (Sanskrit)

देवान्हुवे बृहच्छ्रवसः स्वस्तये ज्योतिष्कृतो अध्वरस्य प्रचेतसः । ये वावृधुः प्रतरं विश्ववेदस इन्द्रज्येष्ठासो अमृता ऋतावृधः ॥

The Mantra's transliteration in English

devān huve bṛhacchravasaḥ svastaye jyotiṣkṛto adhvarasya pracetasaḥ | ye vāvṛdhuḥ prataraṁ viśvavedasa indrajyeṣṭhāso amṛtā ṛtāvṛdhaḥ ||

The Pada Paath (Sanskrit)

दे॒वान् । हु॒वे । बृ॒हत्ऽश्र॑वसः । स्व॒स्तये॑ । ज्यो॒तिः॒ऽकृतः॑ । अ॒ध्व॒रस्य॑ । प्रऽचे॑तसः । ये । व॒वृ॒धुः । प्र॒ऽत॒रम् । वि॒श्वऽवे॑दसः । इन्द्र॑ऽज्येष्ठासः । अ॒मृताः॑ । ऋ॒त॒ऽवृधः॑ ॥

The Pada Paath - transliteration

devān | huve | bṛhat-śravasaḥ | svastaye | jyotiḥ-kṛtaḥ | adhvarasya | pra-cetasaḥ | ye | vavṛdhuḥ | pra-taram | viśva-vedasaḥ | indra-jyeṣṭhāsaḥ | amṛtāḥ | ṛta-vṛdhaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-002

MANTRA NUMBER:

Mantra 2 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 2 of Varga 12 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 89 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्र॑प्रसूता॒ वरु॑णप्रशिष्टा॒ ये सूर्य॑स्य॒ ज्योति॑षो भा॒गमा॑न॒शुः । म॒रुद्ग॑णे वृ॒जने॒ मन्म॑ धीमहि॒ माघो॑ने य॒ज्ञं ज॑नयन्त सू॒रय॑: ॥

The Mantra without meters (Sanskrit)

इन्द्रप्रसूता वरुणप्रशिष्टा ये सूर्यस्य ज्योतिषो भागमानशुः । मरुद्गणे वृजने मन्म धीमहि माघोने यज्ञं जनयन्त सूरयः ॥

The Mantra's transliteration in English

indraprasūtā varuṇapraśiṣṭā ye sūryasya jyotiṣo bhāgam ānaśuḥ | marudgaṇe vṛjane manma dhīmahi māghone yajñaṁ janayanta sūrayaḥ ||

The Pada Paath (Sanskrit)

इन्द्र॑ऽप्रसूताः । वरु॑णऽप्रशिष्टाः । ये । सूर्य॑स्य । ज्योति॑षः । भा॒गम् । आ॒न॒शुः । म॒रुत्ऽग॑णे । वृ॒जने॑ । मन्म॑ । धी॒म॒हि॒ । माघो॑ने । य॒ज्ञम् । ज॒न॒य॒न्त॒ । सू॒रय॑: ॥

The Pada Paath - transliteration

indra-prasūtāḥ | varuṇa-praśiṣṭāḥ | ye | sūryasya | jyotiṣaḥ | bhāgam | ānaśuḥ | marut-gaṇe | vṛjane | manma | dhīmahi | māghone | yajñam | janayanta | sūrayaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-003

MANTRA NUMBER:

Mantra 3 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 3 of Varga 12 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 90 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रो॒ वसु॑भिः॒ परि॑ पातु नो॒ गय॑मादि॒त्यैर्नो॒ अदि॑तिः॒ शर्म॑ यच्छतु । रु॒द्रो रु॒द्रेभि॑र्दे॒वो मृ॑ळयाति न॒स्त्वष्टा॑ नो॒ ग्नाभि॑: सुवि॒ताय॑ जिन्वतु ॥

The Mantra without meters (Sanskrit)

इन्द्रो वसुभिः परि पातु नो गयमादित्यैर्नो अदितिः शर्म यच्छतु । रुद्रो रुद्रेभिर्देवो मृळयाति नस्त्वष्टा नो ग्नाभिः सुविताय जिन्वतु ॥

The Mantra's transliteration in English

indro vasubhiḥ pari pātu no gayam ādityair no aditiḥ śarma yacchatu | rudro rudrebhir devo mṛḻayāti nas tvaṣṭā no gnābhiḥ suvitāya jinvatu ||

The Pada Paath (Sanskrit)

इन्द्रः॑ । वसु॑ऽभिः । परि॑ । पा॒तु॒ । न॒ः । गय॑म् । आ॒दि॒त्यैः । न॒ः । अदि॑तिः । शर्म॑ । य॒च्छ॒तु॒ । रु॒द्रः । रु॒द्रेभिः॑ । दे॒वः । मृ॒ळ॒या॒ति॒ । न॒ः । त्वष्टा॑ । न॒ः । ग्नाभिः॑ । सु॒वि॒ताय॑ । जि॒न्व॒तु॒ ॥

The Pada Paath - transliteration

indraḥ | vasu-bhiḥ | pari | pātu | naḥ | gayam | ādityaiḥ | naḥ | aditiḥ | śarma | yacchatu | rudraḥ | rudrebhiḥ | devaḥ | mṛḷayāti | naḥ | tvaṣṭā | naḥ | gnābhiḥ | suvitāya | jinvatu

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-004

MANTRA NUMBER:

Mantra 4 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 4 of Varga 12 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 91 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अदि॑तिर्द्यावा॑पृथि॒वी ऋ॒तं म॒हदिन्द्रा॒विष्णू॑ म॒रुतः॒ स्व॑र्बृ॒हत् । दे॒वाँ आ॑दि॒त्याँ अव॑से हवामहे॒ वसू॑न्रु॒द्रान्त्स॑वि॒तारं॑ सु॒दंस॑सम् ॥

The Mantra without meters (Sanskrit)

अदितिर्द्यावापृथिवी ऋतं महदिन्द्राविष्णू मरुतः स्वर्बृहत् । देवाँ आदित्याँ अवसे हवामहे वसून्रुद्रान्त्सवितारं सुदंससम् ॥

The Mantra's transliteration in English

aditir dyāvāpṛthivī ṛtam mahad indrāviṣṇū marutaḥ svar bṛhat | devām̐ ādityām̐ avase havāmahe vasūn rudrān savitāraṁ sudaṁsasam ||

The Pada Paath (Sanskrit)

अदि॑तिः । द्यावा॑पृथि॒वी इति॑ । ऋ॒तम् । म॒हत् । इन्द्रा॒विष्णू॒ इति॑ । म॒रुतः॑ । स्व१॒॑रिति॑ । बृ॒हत् । दे॒वान् । आ॒दि॒त्यान् । अव॑से । ह॒वा॒म॒हे॒ । वसू॑न् । रु॒द्रान् । स॒वि॒तार॑म् । सु॒ऽदंस॑सम् ॥

The Pada Paath - transliteration

aditiḥ | dyāvāpṛthivī iti | ṛtam | mahat | indrāviṣṇūiti | marutaḥ | svaḥ | bṛhat | devān | ādityān | avase | havāmahe | vasūn | rudrān | savitāram | su-daṃsasam

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-005

MANTRA NUMBER:

Mantra 5 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 5 of Varga 12 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 92 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

सरस्वान्धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना । ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन्त्रिवरूथमंहसः ॥

The Mantra without meters (Sanskrit)

सरस्वान्धीभिर्वरुणो धृतव्रतः पूषा विष्णुर्महिमा वायुरश्विना । ब्रह्मकृतो अमृता विश्ववेदसः शर्म नो यंसन्त्रिवरूथमंहसः ॥

The Mantra's transliteration in English

sarasvān dhībhir varuṇo dhṛtavrataḥ pūṣā viṣṇur mahimā vāyur aśvinā | brahmakṛto amṛtā viśvavedasaḥ śarma no yaṁsan trivarūtham aṁhasaḥ ||

The Pada Paath (Sanskrit)

सरस्वान् । धीभिः । वरुणः । धृतऽव्रतः । पूषा । विष्णुः । महिमा । वायुः । अश्विना । ब्रह्मऽकृतः । अमृताः । विश्वऽवेदसः । शर्म । नः । यंसन् । त्रिऽवरूथम् । अंहसः ॥

The Pada Paath - transliteration

sarasvān | dhībhiḥ | varuṇaḥ | dhṛta-vrataḥ | pūṣā | viṣṇuḥ | mahimā | vāyuḥ | aśvinā | brahma-kṛtaḥ | amṛtāḥ | viśva-vedasaḥ | śarma | naḥ | yaṃsan | tri-varūtham | aṃhasaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-006

MANTRA NUMBER:

Mantra 6 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 1 of Varga 13 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 93 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

वृषा॑ य॒ज्ञो वृष॑णः सन्तु य॒ज्ञिया॒ वृष॑णो दे॒वा वृष॑णो ह॒वि॒ष्कृतः॑ । वृष॑णा॒ द्यावा॑पृथि॒वी ऋ॒ताव॑री॒ वृषा॑ प॒र्जन्यो॒ वृष॑णो वृष॒स्तुभः॑ ॥

The Mantra without meters (Sanskrit)

वृषा यज्ञो वृषणः सन्तु यज्ञिया वृषणो देवा वृषणो हविष्कृतः । वृषणा द्यावापृथिवी ऋतावरी वृषा पर्जन्यो वृषणो वृषस्तुभः ॥

The Mantra's transliteration in English

vṛṣā yajño vṛṣaṇaḥ santu yajñiyā vṛṣaṇo devā vṛṣaṇo haviṣkṛtaḥ | vṛṣaṇā dyāvāpṛthivī ṛtāvarī vṛṣā parjanyo vṛṣaṇo vṛṣastubhaḥ ||

The Pada Paath (Sanskrit)

वृषा॑ । य॒ज्ञः । वृष॑णः । स॒न्तु॒ । य॒ज्ञिया॑ः । वृष॑णः । दे॒वाः । वृष॑णः । ह॒विः॒ऽकृतः॑ । वृष॑णा । द्यावा॑पृथि॒वी इति॑ । ऋ॒तऽव॑री॒ इत्यृ॒तऽव॑री । वृषा॑ । प॒र्जन्यः॑ । वृष॑णः । वृ॒ष॒ऽस्तुभः॑ ॥

The Pada Paath - transliteration

vṛṣā | yajñaḥ | vṛṣaṇaḥ | santu | yajñiyāḥ | vṛṣaṇaḥ | devāḥ | vṛṣaṇaḥ | haviḥ-kṛtaḥ | vṛṣaṇā | dyāvāpṛthivī iti | ṛta-varī ity ṛta-varī | vṛṣā | parjanyaḥ | vṛṣaṇaḥ | vṛṣa-stubhaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-007

MANTRA NUMBER:

Mantra 7 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 2 of Varga 13 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 94 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒ग्नीषोमा॑ वृष॑णा॒ वाज॑सातये पुरुप्र॒श॒स्ता वृष॑णा॒ उप॑ ब्रुवे । यावी॑जि॒रे वृष॑णो देवय॒ज्यया॑ ता न॒ः शर्म॑ त्रि॒वरू॑थं॒ वि यं॑सतः ॥

The Mantra without meters (Sanskrit)

अग्नीषोमा वृषणा वाजसातये पुरुप्रशस्ता वृषणा उप ब्रुवे । यावीजिरे वृषणो देवयज्यया ता नः शर्म त्रिवरूथं वि यंसतः ॥

The Mantra's transliteration in English

agnīṣomā vṛṣaṇā vājasātaye purupraśastā vṛṣaṇā upa bruve | yāv ījire vṛṣaṇo devayajyayā tā naḥ śarma trivarūthaṁ vi yaṁsataḥ ||

The Pada Paath (Sanskrit)

अ॒ग्नीषोमा॑ । वृष॑णा । वाज॑ऽसातये । पु॒रु॒ऽप्र॒श॒स्ता । वृष॑णौ । उप॑ । ब्रु॒वे॒ । यौ । ई॒जि॒रे । वृष॑णः । दे॒व॒ऽय॒ज्यया॑ । ता । न॒ः । शर्म॑ । त्रि॒ऽवरू॑थम् । वि । यां॒स॒त॒ः ॥

The Pada Paath - transliteration

agnīṣomā | vṛṣaṇā | vāja-sātaye | puru-praśastā | vṛṣaṇau | upa | bruve | yau | ījire | vṛṣaṇaḥ | deva-yajyayā | tā | naḥ | śarma | tri-varūtham | vi | yāṃsataḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-008

MANTRA NUMBER:

Mantra 8 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 3 of Varga 13 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 95 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः । अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये ॥

The Mantra without meters (Sanskrit)

धृतव्रताः क्षत्रिया यज्ञनिष्कृतो बृहद्दिवा अध्वराणामभिश्रियः । अग्निहोतार ऋतसापो अद्रुहोऽपो असृजन्ननु वृत्रतूर्ये ॥

The Mantra's transliteration in English

dhṛtavratāḥ kṣatriyā yajñaniṣkṛto bṛhaddivā adhvarāṇām abhiśriyaḥ | agnihotāra ṛtasāpo adruho 'po asṛjann anu vṛtratūrye ||

The Pada Paath (Sanskrit)

धृतऽव्रताः । क्षत्रियाः । यज्ञनिःऽकृतः । बृहत्ऽदिवाः । अध्वराणाम् । अभिऽश्रियः । अग्निऽहोतारः । ऋतऽसापः । अद्रुहः । अपः । असृजन् । अनु । वृत्रऽतूर्ये ॥

The Pada Paath - transliteration

dhṛta-vratāḥ | kṣatriyāḥ | yajñaniḥ-kṛtaḥ | bṛhat-divāḥ | adhvarāṇām | abhi-śri yaḥ | agni-hāotāraḥ | ṛta-sāpaḥ | adruhaḥ | apaḥ | asṛjan | anu | vṛtra-tūyer

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-009

MANTRA NUMBER:

Mantra 9 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 4 of Varga 13 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 96 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- पादनिचृज्ज्गती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञिया । अन्तरिक्षं स्व१रा पप्रुरूतये वशं देवासस्तन्वी३ नि मामृजुः ॥

The Mantra without meters (Sanskrit)

द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञिया । अन्तरिक्षं स्वरा पप्रुरूतये वशं देवासस्तन्वी नि मामृजुः ॥

The Mantra's transliteration in English

dyāvāpṛthivī janayann abhi vratāpa oṣadhīr vanināni yajñiyā | antarikṣaṁ svar ā paprur ūtaye vaśaṁ devāsas tanvī ni māmṛjuḥ ||

The Pada Paath (Sanskrit)

द्यावापृथिवी इति । जनयन् । अभि । व्रता । आपः । ओषधीः । वनिनानि । यज्ञिया । अन्तरिक्षम् । स्वः । आ । पप्रुः । ऊतये । वशम् । देवासः । तन्वि । नि । ममृजुः ॥

The Pada Paath - transliteration

dyāvāpṛthivī iti | janayan | abhi | vratā | āpaḥ | oṣadhīḥ | vanināni | yajñiyā | antarikṣam | svaḥ | ā | papruḥ | ūtaye | vaśam | devāsaḥ | tanvi | ni | mamṛjuḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-010

MANTRA NUMBER:
Mantra 10 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 5 of Varga 13 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 97 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:
ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः । आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥

The Mantra without meters (Sanskrit)

धर्तारो दिव ऋभवः सुहस्ता वातापर्जन्या महिषस्य तन्यतोः । आप ओषधीः प्र तिरन्तु नो गिरो भगो रातिर्वाजिनो यन्तु मे हवम् ॥

The Mantra's transliteration in English

dhartāro diva ṛbhavaḥ suhastā vātāparjanyā mahiṣasya tanyatoḥ | āpa oṣadhīḥ pra tirantu no giro bhago rātir vājino yantu me havam ||

The Pada Paath (Sanskrit)

धर्तारः । दिवः । ऋभवः । सुऽहस्ताः । वातापर्जन्या । महिषस्य । तन्यतोः । आपः । ओषधीः । प्र । तिरन्तु । नः । गिरः । भगः । रातिः । वाजिनः । यन्तु । मे । हवम् ॥

The Pada Paath - transliteration

dhartāraḥ | divaḥ | ṛbhavaḥ | su-hastāḥ | vātāparjanyā | mahiṣasya | tanyatoḥ | āpaḥ | oṣadhīḥ | pra | tirantu | naḥ | giraḥ | bhagaḥ | rātiḥ | vājinaḥ | yantu | me | havam

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-011

MANTRA NUMBER:

Mantra 11 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 1 of Varga 14 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 98 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषिः (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराड्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒मु॒द्रः सिन्धू॒ रजो॑ अ॒न्तरि॑क्षम॒ज एक॑पात्तनयि॒त्नुर॑र्ण॒वः । अहि॑र्बु॒ध्न्यः॑ शृणव॒द्वचां॑सि मे॒ विश्वे॑ दे॒वास॑ उ॒त सू॒रयो॒ मम॑ ॥

The Mantra without meters (Sanskrit)

समुद्रः सिन्धू रजो अन्तरिक्षमज एकपात्तनयित्नुरर्णवः । अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम ॥

The Mantra's transliteration in English

samudraḥ sindhū rajo antarikṣam aja ekapāt tanayitnur arṇavaḥ | ahir budhnyaḥ śṛṇavad vacāṁsi me viśve devāsa uta sūrayo mama ||

The Pada Paath (Sanskrit)

स॒मु॒द्रः । सिन्धुः॑ । रजः॑ । अ॒न्तरि॑क्षम् । अ॒जः । एक॑ऽपात् । त॒न॒यि॒त्नुः । अ॒र्ण॒वः । अहिः॑ । बु॒ध्न्यः॑ । शृ॒णव॒त् । वचां॑सि । मे॒ । विश्वे॑ । दे॒वासः॑ । उ॒त । सू॒रयः॑ । मम॑ ॥

The Pada Paath - transliteration

samudraḥ | sindhuḥ | rajaḥ | antarikṣam | ajaḥ | eka-pāt | tanayitnuḥ | arṇavaḥ | ahiḥ | budhnyaḥ | śṛṇavat | vacāṃsi | me | viśve | devāsaḥ | uta | sūrayaḥ | mama

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-012

MANTRA NUMBER:

Mantra 12 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 2 of Varga 14 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 99 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

स्याम॑ वो॒ मन॑वो दे॒ववी॑तये॒ प्राञ्चं॑ नो य॒ज्ञं प्र ण॑यत साधु॒या । आदि॑त्या॒ रुद्रा॒ वस॑वः॒ सुदा॑नव इ॒मा ब्रह्म॑ श॒स्यमा॑नानि जिन्वत ॥

The Mantra without meters (Sanskrit)

स्याम वो मनवो देववीतये प्राञ्चं नो यज्ञं प्र णयत साधुया । आदित्या रुद्रा वसवः सुदानव इमा ब्रह्म शस्यमानानि जिन्वत ॥

The Mantra's transliteration in English

syāma vo manavo devavītaye prāñcaṁ no yajñam pra ṇayata sādhuyā | ādityā rudrā vasavaḥ sudānava imā brahma śasyamānāni jinvata ||

The Pada Paath (Sanskrit)

स्याम॑ । व॒ः । मन॑वः । दे॒वऽवी॑तये । प्राञ्च॑म् । न॒ः । य॒ज्ञम् । प्र । न॒य॒त॒ । सा॒धु॒ऽया । आदी॑त्याः । रुद्राः॑ । वस॑वः । सु॒ऽदा॑नवः । इ॒मा । ब्रह्म॑ । श॒स्यमा॑नानि । जि॒न्व॒त॒ ॥

The Pada Paath - transliteration

syāma | vaḥ | manavaḥ | deva-vītaye | prāñcam | naḥ | yajñam | pra | nayata | sādhu-yā | ādītyāḥ | rudrāḥ | vasavaḥ | su-dānavaḥ | imā | brahma | śasyamānāni | jinvata

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-013

MANTRA NUMBER:

Mantra 13 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 3 of Varga 14 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 100 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- निचृज्जगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

दैव्या॒ होता॑रा प्रथ॒मा पु॒रोहि॑त ऋ॒तस्य॒ पन्था॒मन्वे॑मि साधु॒या । क्षेत्र॑स्य॒ पतिं॒ प्रति॑वेशमीमहे॒ विश्वा॑न्दे॒वाँ अ॒मृताँ॒ अप्र॑युच्छतः ॥

The Mantra without meters (Sanskrit)

दैव्या होतारा प्रथमा पुरोहित ऋतस्य पन्थामन्वेमि साधुया । क्षेत्रस्य पतिं प्रतिवेशमीमहे विश्वान्देवाँ अमृताँ अप्रयुच्छतः ॥

The Mantra's transliteration in English

daivyā hotārā prathamā purohita ṛtasya panthām anv emi sādhuyā | kṣetrasya patim prativeśam īmahe viśvān devām̐ amṛtām̐ aprayucchataḥ ||

The Pada Paath (Sanskrit)

दैव्याः॑ । होता॑रा । प्र॒थ॒मा । पु॒रः॒ऽहि॑ता । ऋ॒तस्य॑ । पन्था॑म् । अनु॑ । ए॒मि॒ । सा॒धु॒ऽया । क्षेत्र॑स्य । पति॑म् । प्रति॑ऽवेशम् । ई॒म॒हे॒ । विश्वा॑न् । दे॒वान् । अ॒मृता॑न् । अप्र॑ऽयुच्छतः ॥

The Pada Paath - transliteration

daivyāḥ | hotārā | prathamā | puraḥ-hitā | ṛtasya | panthām | anu | emi | sādhu-yā | kṣetrasya | patim | prati-veśam | īmahe | viśvān | devān | amṛtān | apra-yucchataḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-014

MANTRA NUMBER:

Mantra 14 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 4 of Varga 14 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 101 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- स्वराडार्चीजगती

स्वर: (Swar) :- निषादः

THE MANTRA

The Mantra with meters (Sanskrit)

वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये । प्रीता इव ज्ञातयः काममेत्यास्मे देवासोऽव धूनुता वसु ॥

The Mantra without meters (Sanskrit)

वसिष्ठासः पितृवद्वाचमक्रत देवाँ ईळाना ऋषिवत्स्वस्तये । प्रीता इव ज्ञातयः काममेत्यास्मे देवासोऽव धूनुता वसु ॥

The Mantra's transliteration in English

vasiṣṭhāsaḥ pitṛvad vācam akrata devām̐ īl̤ānā ṛṣivat svastaye | prītā iva jñātayaḥ kāmam etyāsme devāso 'va dhūnutā vasu ||

The Pada Paath (Sanskrit)

वसिष्ठासः । पितृऽवत् । वाचम् । अक्रत । देवान् । ईळानाः । ऋषिऽवत् । स्वस्तये । प्रीताःऽइव । ज्ञातयः । कामम् । आऽइत्य । अस्मे इति । देवासः । अव । धूनुत । वसु ॥

The Pada Paath - transliteration

vasiṣṭhāsaḥ | pitṛ-vat | vācam | akrata | devān | īl̤ānāḥ | ṛṣi-vat | svastaye | prītāḥ-iva | jñātayaḥ | kāmam | āitya | asme iti | devāsaḥ | ava | dhūnuta | vasu

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-066/mantra-rig-10-066-015

MANTRA NUMBER:

Mantra 15 of Sukta 66 of Mandal 10 of Rig Veda
Mantra 5 of Varga 14 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 102 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- वसुकर्णो वासुक्रः

देवता (Devataa) :- विश्वेदेवा:

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः । ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥

The Mantra without meters (Sanskrit)

देवान्वसिष्ठो अमृतान्ववन्दे ये विश्वा भुवनाभि प्रतस्थुः । ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥

The Mantra's transliteration in English

devān vasiṣṭho amṛtān vavande ye viśvā bhuvanābhi pratasthuḥ | te no rāsantām urugāyam adya yūyam pāta svastibhiḥ sadā naḥ ||

The Pada Paath (Sanskrit)

देवान् । वसिष्ठः । अमृतान् । ववन्दे । ये । विश्वा । भुवना । अभि । प्रऽतस्थुः । ते । नः । रासन्ताम् । उरुऽगायम् । अद्य । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ॥

The Pada Paath - transliteration

devān | vasiṣṭhaḥ | amṛtān | vavande | ye | viśvā | bhuvanā | abhi | pra-tasthuḥ | te | naḥ | rāsantām | uru-gāyam | adya | yūyam | pāta | svasti-bhiḥ | sadā | naḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-001

MANTRA NUMBER:

Mantra 1 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 1 of Varga 15 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 103 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- विराट्त्रिस्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इ॒मां धियं॑ स॒प्तशी॑र्ष्णीं पि॒ता न॑ ऋ॒तप्र॑जातां बृ॒ह॒तीम॑विन्दत् । तु॒रीयं॑ स्विज्जनयद्वि॒श्वज॑न्यो॒ऽयास्य॑ उ॒क्थमिन्द्रा॑य॒ शंस॑न् ॥

The Mantra without meters (Sanskrit)

इमां धियं सप्तशीर्ष्णीं पिता न ऋतप्रजातां बृहतीमविन्दत् । तुरीयं स्विज्जनयद्विश्वजन्योऽयास्य उक्थमिन्द्राय शंसन् ॥

The Mantra's transliteration in English

imāṁ dhiyaṁ saptaśīrṣṇīm pitā na ṛtaprajātām bṛhatīm avindat | turīyaṁ svij janayad viśvajanyo 'yāsya uktham indrāya śaṁsan ||

The Pada Paath (Sanskrit)

इ॒माम् । धिय॑म् । स॒प्तऽशी॑र्ष्णीम् । पि॒ता । नः॒ । ऋ॒तऽप्रजाताम् । बृ॒ह॒तीम् । अ॒वि॒न्द॒त् । तु॒रीय॑म् । स्वि॒त् । ज॒न॒य॒त् । वि॒श्वऽज॑न्यः । अ॒यास्यः॑ । उ॒क्थम् । इन्द्रा॑य । शंस॑न् ॥

The Pada Paath - transliteration

imām | dhiyam | sapta-śīrṣṇīm | pitā | naḥ | ṛta-prajātām | bṛhatīm | avindat | turīyam | svit | janayat | viśva-janyaḥ | ayāsyaḥ | uktham | indrāya | śaṃsan

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-002

MANTRA NUMBER:

Mantra 2 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 2 of Varga 15 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 104 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ऋ॒तं शंस॑न्त ऋ॒जु दीध्या॑ना दि॒वस्पु॒त्रासो॒ असु॑रस्य वी॒राः । विप्रं॑ प॒दमङ्गि॑रसो॒ दधा॑ना य॒ज्ञस्य॒ धाम॑ प्रथ॒मं म॑नन्त ॥

The Mantra without meters (Sanskrit)

ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः । विप्रं पदमङ्गिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त ॥

The Mantra's transliteration in English

ṛtaṁ śaṁsanta ṛju dīdhyānā divas putrāso asurasya vīrāḥ | vipram padam aṅgiraso dadhānā yajñasya dhāma prathamam mananta ||

The Pada Paath (Sanskrit)

ऋ॒तम् । शंस॑न्तः । ऋ॒जु । दीध्या॑नाः । दि॒वः । पु॒त्रासः॑ । असु॑रस्य । वी॒राः । विप्र॑म् । प॒दम् । अङ्गि॑रसः । दधा॑नाः । य॒ज्ञस्य॑ । धाम॑ । प्र॒थ॒मम् । म॒न॒न्त॒ ॥

The Pada Paath - transliteration

ṛtam | śaṃsantaḥ | ṛju | dīdhyānāḥ | divaḥ | putrāsaḥ | asurasya | vīrāḥ | vipram | padam | aṅgirasaḥ | dadhānāḥ | yajñasya | dhāma | prathamam | mananta

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-003

MANTRA NUMBER:

Mantra 3 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 3 of Varga 15 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 105 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

हं॒सैरि॑व॒ सखि॑भि॒र्वाव॑दद्भि॒रश्म॒न्मया॑नि॒ नह॑ना॒ व्यस्य॑न् । बृह॒स्पति॑रभि॒कनि॑क्रद॒द्गा उ॒त प्रास्तौ॒दुच्च॑ वि॒द्वाँ अ॑गायत् ॥

The Mantra without meters (Sanskrit)

हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि नहना व्यस्यन् । बृहस्पतिरभिकनिक्रदद्गा उत प्रास्तौदुच्च विद्वाँ अगायत् ॥

The Mantra's transliteration in English

haṁsair iva sakhibhir vāvadadbhir aśmanmayāni nahanā vyasyan | bṛhaspatir abhikanikradad gā uta prāstaud uc ca vidvām̐ agāyat ||

The Pada Paath (Sanskrit)

हं॒सैःऽइ॑व । सखि॑ऽभिः । वाव॑दत्ऽभिः । अ॒श्म॒न्ऽमया॑नि । नह॑ना । वि॒ऽअस्य॑न् । बृह॒स्पतिः॑ । अ॒भि॒ऽकनि॑क्रदत् । गाः । उ॒त । प्र । अ॒स्तौ॒त् । उत् । च॒ । वि॒द्वान् । अ॒गा॒य॒त् ॥

The Pada Paath - transliteration

haṃsaiḥ-iva | sakhi-bhiḥ | vāvadat-bhiḥ | aśman-mayāni | nahanā | vi-asyan | bṛhaspatiḥ | abhi-kanikradat | gāḥ | uta | pra | astaut | ut | ca | vidvān | agāyat

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-004

MANTRA NUMBER:

Mantra 4 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 4 of Varga 15 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 106 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

अ॒वो द्वाभ्यां॑ प॒र एक॑या॒ गा गुहा॒ तिष्ठ॑न्ती॒रनृ॑तस्य॒ सेतौ॑ । बृह॒स्पति॒स्तम॑सि॒ ज्योति॑रि॒च्छन्नु॒दुस्रा आक॒र्वि हि ति॒स्र आव॑: ॥

The Mantra without meters (Sanskrit)

अवो द्वाभ्यां पर एकया गा गुहा तिष्ठन्तीरनृतस्य सेतौ । बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा आकर्वि हि तिस्र आवः ॥

The Mantra's transliteration in English

avo dvābhyām para ekayā gā guhā tiṣṭhantīr anṛtasya setau | bṛhaspatis tamasi jyotir icchann ud usrā ākar vi hi tisra āvaḥ ||

The Pada Paath (Sanskrit)

अ॒वः । द्वाभ्या॑म् । प॒रः । एक॑या । गाः । गुहा॑ । तिष्ठ॑न्तीः । अनृ॑तस्य । सेतौ॑ । बृह॒स्पतिः॑ । तम॑सि । ज्योतिः॑ । इ॒च्छन् । उत् उ॒स्राः । आ । अ॒कः॒ । वि । हि । ति॒स्रः । आव॒रित्याव॑: ॥

The Pada Paath - transliteration

avaḥ | dvābhyām | paraḥ | ekayā | gāḥ | guhā | tiṣṭhantīḥ | anṛtasya | setau | bṛhaspatiḥ | tamasi | jyotiḥ | icchan | ut usrāḥ | ā | akaḥ | vi | hi | tiśraḥ | āvar ity āvaḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-005

MANTRA NUMBER:

Mantra 5 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 5 of Varga 15 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 107 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत् । बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥

The Mantra without meters (Sanskrit)

विभिद्या पुरं शयथेमपाचीं निस्त्रीणि साकमुदधेरकृन्तत् । बृहस्पतिरुषसं सूर्यं गामर्कं विवेद स्तनयन्निव द्यौः ॥

The Mantra's transliteration in English

vibhidyā puraṁ śayathem apācīṁ nis trīṇi sākam udadher akṛntat | bṛhaspatir uṣasaṁ sūryaṁ gām arkaṁ viveda stanayann iva dyauḥ ||

The Pada Paath (Sanskrit)

विऽभिद्य । पुरम् । शयथा । ईम् । अपाचीम् । निः । त्रीणि । साकम् । उदऽधेः । अकृन्तत् । बृहस्पतिः । उषसम् । सूर्यम् । गाम् । अर्कम् । विवेद । स्तनयन्ऽइव । द्यौः ॥

The Pada Paath - transliteration

vi-bhidya | puram | śayathā | īm | apācīm | niḥ | trīṇi | sākam | uda-dheḥ | akṛntat | bṛhaspatiḥ | uṣasam | sūryam | gām | arkam | viveda | stanayan-iva | dyauḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-006

MANTRA NUMBER:

Mantra 6 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 6 of Varga 15 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 108 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

इन्द्रो॑ व॒लं र॑क्षि॒तारं॒ दुघा॑नां क॒रेणे॑व॒ वि च॑कर्ता॒ रवे॑ण । स्वेदा॑ञ्जिभिरा॒शिर॑मि॒च्छमा॒नोऽरो॑दयत्प॒णिमा गा अ॑मुष्णात् ॥

The Mantra without meters (Sanskrit)

इन्द्रो वलं रक्षितारं दुघानां करेणेव वि चकर्ता रवेण । स्वेदाञ्जिभिराशिरमिच्छमानोऽरोदयत्पणिमा गा अमुष्णात् ॥

The Mantra's transliteration in English

indro valaṁ rakṣitāraṁ dughānāṁ kareṇeva vi cakartā raveṇa | svedāñjibhir āśiram icchamāno 'rodayat paṇim ā gā amuṣṇāt ||

The Pada Paath (Sanskrit)

इन्द्रः॑ । व॒लम् । र॒क्षि॒तार॑म् । दु॒घा॑नाम् । क॒रेण॑ऽइव । वि । च॒क॒र्त॒ । रवे॑ण । स्वेदा॑ञ्जिऽभिः । आ॒ऽशिर॑म् । इ॒च्छमा॑नः । अरो॑दयत् । प॒णिम् । आ । गाः । अ॒मु॒ष्णा॒त् ॥

The Pada Paath - transliteration

indraḥ | valam | rakṣitāram | dughānām | kareṇa-iva | vi | cakarta | raveṇa | svedāñji-bhiḥ | āśiram | icchamānaḥ | arodayat | paṇim | ā | gāḥ | amuṣṇāt

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-007

MANTRA NUMBER:

Mantra 7 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 1 of Varga 16 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 109 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स ईं स॒त्येभि॒: सखि॑भिः शु॒चद्भि॒र्गोधा॑यसं॒ वि ध॑न॒सैर॑दर्दः । ब्रह्म॑ण॒स्पति॒र्वृष॑भिर्व॒राहै॑र्घ॒र्मस्वे॑देभि॒र्द्रवि॑णं॒ व्या॑नट् ॥

The Mantra without meters (Sanskrit)

स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः । ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ॥

The Mantra's transliteration in English

sa īṁ satyebhiḥ sakhibhiḥ śucadbhir godhāyasaṁ vi dhanasair adardaḥ | brahmaṇas patir vṛṣabhir varāhair gharmasvedebhir draviṇaṁ vy ānaṭ ||

The Pada Paath (Sanskrit)

सः । ई॒म् । स॒त्येभिः॑ । सखि॑ऽभिः । शु॒चत्ऽभिः॑ । गोऽधा॑यसम् । वि । ध॒न॒ऽसैः । अ॒द॒र्द॒रित्य॑दर्दः । ब्रह्म॑णः । पतिः॑ । वृष॑ऽभिः । व॒राहैः॑ । घ॒र्मऽस्वे॑देभिः । द्रवि॑णम् । वि । आ॒न॒ट् ॥

The Pada Paath - transliteration

saḥ | īm | satyebhiḥ | sakhi-bhiḥ | śucat-bhiḥ | go--dhāyasam | vi | dhana-saiḥ | adardar ity adardaḥ | brahmaṇaḥ | patiḥ | vṛṣa-bhiḥ | varāhaiḥ | gharma-svedebhiḥ | draviṇam | vi | ānaṭ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-008

MANTRA NUMBER:

Mantra 8 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 2 of Varga 16 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 110 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

ते स॒त्येन॒ मन॑सा॒ गोप॑तिं॒ गा इ॑या॒नास॑ इषणयन्त धी॒भिः । बृह॒स्पति॑र्मि॒थोअ॑वद्यपेभि॒रुदु॒स्रिया॑ असृजत स्व॒युग्भि॑ः ॥

The Mantra without meters (Sanskrit)

ते सत्येन मनसा गोपतिं गा इयानास इषणयन्त धीभिः । बृहस्पतिर्मिथोअवद्यपेभिरुदुस्रिया असृजत स्वयुग्भिः ॥

The Mantra's transliteration in English

te satyena manasā gopatiṁ gā iyānāsa iṣaṇayanta dhībhiḥ | bṛhaspatir mithoavadyapebhir ud usriyā asṛjata svayugbhiḥ ||

The Pada Paath (Sanskrit)

ते । स॒त्येन॑ । मन॑सा । गोऽप॑तिम् । गाः । इ॒या॒नासः॑ । इ॒ष॒ण॒य॒न्त॒ । धी॒भिः । बृ॒ह॒स्पतिः॑ । मि॒थःऽअ॑वद्यपेभिः । उत् । उ॒स्रियाः॑ । अ॒सृ॒ज॒त॒ । स्व॒यु॒क्ऽभिः॑ ॥

The Pada Paath - transliteration

te | satyena | manasā | go--patim | gāḥ | iyānāsaḥ | iṣaṇayanta | dhībhiḥ | bṛhaspatiḥ | mithaḥ-avadyapebhiḥ | ut | usriyāḥ | asṛjata | svayuk-bhiḥ

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-009

MANTRA NUMBER:

Mantra 9 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 3 of Varga 16 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 111 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

तं व॒र्धय॑न्तो म॒तिभि॑: शि॒वाभि॑: सिं॒हमि॑व॒ नान॑दतं स॒धस्थे॑ । बृह॒स्पतिं॒ वृष॑णं॒ शूर॑साता॒ भरे॑भरे॒ अनु॑ मदेम जि॒ष्णुम् ॥

The Mantra without meters (Sanskrit)

तं वर्धयन्तो मतिभिः शिवाभिः सिंहमिव नानदतं सधस्थे । बृहस्पतिं वृषणं शूरसातौ भरेभरे अनु मदेम जिष्णुम् ॥

The Mantra's transliteration in English

taṁ vardhayanto matibhiḥ śivābhiḥ siṁham iva nānadataṁ sadhasthe | bṛhaspatiṁ vṛṣaṇaṁ śūrasātau bhare-bhare anu madema jiṣṇum ||

The Pada Paath (Sanskrit)

तम् । व॒र्धय॑न्तः । म॒तिऽभि॑ः । शि॒वाभि॑ः । सिं॒हम्ऽइ॑व । नान॑दतम् । स॒धऽस्थे॑ । बृह॒स्पति॒म् । वृष॑णम् । शूर॑ऽसातौ । भरे॑ऽभरे । अनु॑ । म॒दे॒म॒ । जि॒ष्णुम् ॥

The Pada Paath - transliteration

tam | vardhayantaḥ | mati-bhiḥ | śivābhiḥ | siṃham-iva | nānadatam | sadha-sthe | bṛhaspatim | vṛṣaṇam | śūra-sātau | bhare--bhare | anu | madema | jiṣṇum

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-010

MANTRA NUMBER:

Mantra 10 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 4 of Varga 16 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 112 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म । बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ॥

The Mantra without meters (Sanskrit)

यदा वाजमसनद्विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म । बृहस्पतिं वृषणं वर्धयन्तो नाना सन्तो बिभ्रतो ज्योतिरासा ॥

The Mantra's transliteration in English

yadā vājam asanad viśvarūpam ā dyām arukṣad uttarāṇi sadma | bṛhaspatiṁ vṛṣaṇaṁ vardhayanto nānā santo bibhrato jyotir āsā ||

The Pada Paath (Sanskrit)

यदा । वाजम् । असनत् । विश्वऽरूपम् । आ । द्याम् । अरुक्षत् । उत्ऽतराणि । सद्म । बृहस्पतिम् । वृषणम् । वर्धयन्तः । नाना । सन्तः । बिभ्रतः । ज्योतिः । आसा ॥

The Pada Paath - transliteration

yadā | vājam | asanat | viśva-rūpam | ā | dyām | arukṣat | ut-tarāṇi | sadma | bṛhaspatim | vṛṣaṇam | vardhayantaḥ | nānā | santaḥ | bibhrataḥ | jyotiḥ | āsā

Link: www.vedakosh.com/rig-veda/mandal-10/sukta-067/mantra-rig-10-067-011

MANTRA NUMBER:

Mantra 11 of Sukta 67 of Mandal 10 of Rig Veda
Mantra 5 of Varga 16 of Adhyaya 2 of Ashtak 8 of Rig Veda
Mantra 113 of Anuvaak 5 of Mandal 10 of Rig Veda

MANTRA DEFINITIONS:

ऋषि: (Rishi) :- अयास्यः

देवता (Devataa) :- बृहस्पतिः

छन्द: (Chhand) :- निचृत्त्रिष्टुप्

स्वर: (Swar) :- धैवतः

THE MANTRA

The Mantra with meters (Sanskrit)

स॒त्यामा॒शिषं॑ कृणुता वयो॒धै की॒रिं चि॒द्ध्यव॑थ॒ स्वेभि॑रे॒वैः । प॒श्चा मृधो॒ अप॑ भवन्तु॒ विश्वा॒स्तद्रो॑दसी शृणुतं विश्वमि॒न्वे ॥

The Mantra without meters (Sanskrit)

सत्यामाशिषं कृणुता वयोधै कीरिं चिद्ध्यवथ स्वेभिरेवैः । पश्चा मृधो अप भवन्तु विश्वास्तद्रोदसी शृणुतं विश्वमिन्वे ॥

The Mantra's transliteration in English

satyām āśiṣaṁ kṛṇutā vayodhai kīriṁ cid dhy avatha svebhir evaiḥ | paścā mṛdho apa bhavantu viśvās tad rodasī śṛṇutaṁ viśvaminve ||

The Pada Paath (Sanskrit)

स॒त्याम् । आ॒ऽशिष॑म् । कृ॒णु॒त॒ । व॒यः॒ऽधै । की॒रिम् । चि॒त् । हि । अव॑थ । स्वेभिः॑ । एवैः॑ । प॒श्चा । मृधः॑ । अप॑ । भ॒व॒न्तु॒ । विश्वाः॑ । तत् । रो॒द॒सी॒ इति॑ । शृ॒णु॒त॒म् । वि॒श्व॒मि॒न्वे इति॑ वि॒श्व॒म्ऽइ॒न्वे ॥

The Pada Paath - transliteration

